इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते। तथाहि—यथा वृक्षाणां समष्टयभिप्रायेण वनमित्येकत्वव्यपदेशो यथा वा जलानां समष्टयभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्टयभिप्रायेण तदेकत्वव्यपदेशः। 'अजामेकाम्'—इत्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना। एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वाद्। 'यः सर्वज्ञः सर्ववित्' इति श्रुतेः। ईश्वरस्येयं समष्टिरखिलकारणत्वात् कारणशरीरमानन्दप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते। यथा वनस्य व्यष्टयभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशो यथा वा जलाशयस्य व्यष्टयभिप्रायेण जलानीति तथाऽज्ञानस्य व्यष्टयभिप्रायेण तदनेकत्वव्यपदेशः 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतेः। अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः। इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते, एकाज्ञानावभासकत्वात्। अस्य प्राज्ञत्वमस्पष्टोपाधितयाऽनतिप्रकाशकत्वात् अस्यानन्दमयकोशः सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मशरीरप्रपञ्चलयस्थानमिति चोच्यते ॥ ७ ॥

भेदः—'अजामेकामि'त्यादिश्रुतिभिरज्ञानस्यैकत्वे प्रतिपादितेऽपि 'इन्द्रो मायाभि'रित्यादिश्रुतिभिस्तस्यानेकत्वप्रतिपादनात्सन्दिग्धिरिति तन्निरासाय समष्टिव्यष्टिरूपेणाज्ञानं द्विधा विभज्य तथा हीत्यादिनोदाहृत्य स्पष्टीक्रियते—

भिन्नजातीयवृक्षाणां सामूहिकरूपेण यथा वनमित्येकत्वविशिष्टा संज्ञा, यथा वा जलानां समष्टयभिप्रायेण जलाशय इति संज्ञा तथैवानेकत्वेन प्रतीयमानानां जीवगताज्ञानानां समष्टयभिप्रायेण 'अज्ञानम्' इत्येकत्वव्यपदेशे 'अजामेकामि'त्यादिश्रुतीनामविरोधः। अज्ञानस्यैतत्समष्टिरूपम्।

ईश्वरचैतन्यम्—अस्मिन् समष्टिभूताज्ञाने रजस्तमोऽनभिभूतसत्त्वगुणस्य प्राधान्यम्। एवंभूतसत्त्वप्रधानाज्ञानसमष्टयुपहितचैतन्यं सर्वचराचरप्रपञ्चस्य साक्षितया सर्वज्ञातृत्वेन सर्वज्ञः तथा सर्वेषां जीवानां कर्मानुरूपफलदातृत्वेन

सर्वेश्वरः, सर्वेषां प्राणिनामन्तःस्थित्या तद्बुद्धिनियामकत्वेन सर्वान्तर्यामी, एवं सम्पूर्णचराचरात्मकप्रपञ्चोत्पादकविवर्ताधिष्ठानत्वेनेश्वरश्चोच्यते। तच्च समष्टिभूताज्ञानस्यावभासकम्। सामान्यरूपेण स सर्वं जानाति विशेषरूपेणापि च न किञ्चित्तदविज्ञातं वर्तते, 'यः सर्वज्ञः सर्ववित्' एषा श्रुतिरिदम्परा। 'तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः' इत्यादियोगवाशिष्टवाक्यमप्येतत्परकमेव।

ईश्वरस्येयं समष्टिः (समुदायोपाधिः) सर्वस्य कारणमिति कारणशरीरम्, आनन्दप्राचुर्यादानन्दमयः, आत्मनः कोशवदाच्छादकत्वाच्च कोश इति चोच्यते। अत्रैव हि जाग्रदवस्थाविशिष्टपञ्चीकृतभूतकार्यस्वरूपस्थूलप्रपञ्चस्य, स्वप्नावस्थाविशिष्टापञ्चीकृतभूतकार्यस्वरूपसूक्ष्मस्वाप्नप्रपञ्चस्य च लय इत्येषा सुषुप्तिः, स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते। कारणावस्थायां प्रकृतिपुरुषावतिरिच्य स्थूलसूक्ष्मकार्यप्रपञ्चं न किमपि तिष्ठतीति तत्रानन्दप्राचुर्यम्। यथा च त्वक् शरीरमाच्छादयति तथैवाज्ञानमप्यात्मानमावृणोतीति कोशः, तथा सम्पूर्णस्थूलसूक्ष्मोपाधयोऽस्मिन्नेव कारणोपाधौ विलीयन्तेऽतः सुषुप्तिरित्युच्यते।

प्राज्ञचैतन्यम्—भिन्नजातीयतरुषु सामूहिकरूपेण यथा वनमिति व्यवहृतिः, पार्थक्येन च प्रत्येकवृक्षजिज्ञापयिषया यथा तत्राम्रः, खदिरः, पलाश इत्यादिव्यवहृतिः, यथा वा सर्वेषां जलानामेकत्वबुबोधयिषया जलाशय इति व्यपदिष्टिः पार्थक्येन च प्रत्येकजलेजिज्ञपयिषया नदीतडागादिव्यपदिष्टिः। एवमखिलप्रपञ्चकारणभूताज्ञाने समष्टिरूपेणाज्ञानमिति व्यवहारः, किन्तु जीवगताहंकारादिकारणभूताज्ञाने व्यष्टिरूपेण भिन्नत्वविवक्षया बहुत्वव्यवहारः। एतदेव 'इन्द्रो मायाभिः पुरुरूप ईयते' (इन्द्रः परमेश्वरः मायाभिः अज्ञानैः, पुरुरूपः बहुरूपः ईयते प्रकाशते), इति श्रुत्यापि स्पष्टीकृतम्। इदञ्चाज्ञानस्य व्यष्टिरूपं निकृष्टस्य (जीवस्य) चोपाधिः। इत्थञ्चाज्ञानस्य (अविद्यायाः) एकत्वेऽपि सामूहिकरूपेण दृश्यमानाखिलप्रपञ्चस्य हेतुतया पार्थक्येनाहङ्कारादीनामपि कारणत्वेन च तस्मिन्मृत्पिण्डवन्मृद्घटादिवद् वा स्वर्णपिण्डवत्तन्निर्मितकटककुण्डलवद् वाऽभेदविवक्षया समष्टिव्यष्टिताव्यवहारो न विरुध्यते।

जीवगताहङ्कारादिकारणभूताज्ञानस्यास्यां व्यष्टौ रजस्तमोऽभिभूतस्य मलिनसत्त्वस्य प्राधान्यम्। तदुपहितचैतन्यमप्यल्पज्ञतयाऽनीश्वरतयैकाज्ञानस्यैकांशावभासकत्वेन च (भिन्नाभिन्नजीवगताज्ञानावभासकत्वेन) प्रकृष्टेन अज्ञः प्राज्ञः उच्यते। किन्तु यथेश्वरचैतन्यगताज्ञाने कारणशरीरम्, आनन्दमयकोशः

सुषुप्तिरित्यादिव्यवहृतस्तथैव प्राज्ञचैतन्यगताज्ञानेऽपीति बोध्यम् । यतो हि यथा प्रलयकाले ईश्वरचैतन्यगताज्ञानं सम्पूर्णप्रपञ्चस्य हिरण्यगर्भादेरुत्पादकत्वे कारण-शरीरम्, उच्यते, तदानीं प्रकृतिपुरुषावतिरिच्यान्यस्य स्थूलसूक्ष्मप्रपञ्चस्याभावा-दानन्दमयत्वम् तथा स्थूलसूक्ष्माखिलोपाधीनां विलयानाधारत्वात्सर्वप्रपञ्चलय-स्थानं सुषुप्तिरिति चोच्यते तथैव प्राज्ञचैतन्यगताज्ञानमपि सुषुप्तिकालेऽज्ञानादि-शरीरोत्पादकमिति कारणशरीरम्, सुषुप्तिकाले चेन्द्रियाणां तद्विषयाणां च राहित्येन कस्याञ्चिदप्यासक्तेरभावादानन्दप्राचुर्येणानन्दमयम्, प्राज्ञचैतन्या-च्छादकत्वेन च कोशः एवं स्थूलसूक्ष्मशरीरविलयाधारत्वात् स्थूलसूक्ष्मशरीर-लयस्थानमिति सुषुप्तिश्चोच्यते ।

[पञ्चीकृतस्थूलशरीरं (व्यावहारिकसत्ता) अपञ्चीकृतसूक्ष्मशरीरे (प्राति-भासिकसत्तायाम्) विलीयते । तदनन्तरं तस्यापि च (प्रातिभासिकप्रपञ्चस्य) स्वकारणभूताज्ञाने विलीनत्वात्सर्वोपरतिः] यथा चोक्तं वाक्यसुधायाम्—

'लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरङ्गके' इत्यादि ।

फेनो हि यदा जले विलीयते तदीयांशिकद्रवत्वादितराङ्गेष्ववशिनष्टि तस्मिन्नपि च द्रवत्वादौ जले सर्वथा विलीने पूर्ववच्छुद्धं जलमेवावतिष्ठते। एवमेव पूर्वव्यावहारिकसत्ता प्रातिभासिकसत्तायां विलयं याति ततस्तस्यामपि च विलीनायां शुद्धचैतन्यमात्रमवतिष्ठते इति भावः ॥ ७ ॥

समष्टि और व्यष्टिरूप अज्ञान के दो भेद—'अजामेकाम्' इत्यादि श्रुतियों से अज्ञान एक सिद्ध होता है परन्तु "इन्द्रो मायाभिः पुरुरूप ईयते' इससे यह भी सिद्ध होता है, कि वह अनेक है । अतः इस सन्देह का निवारण करने के लिए अज्ञान का विभाग करते हैं । अर्थात् वह अज्ञान एक भी है और अनेक भी है—समष्टि (सामान्य) रूप से एक है और व्यष्टि (अलग-अलग) रूप से अनेक है । इसी बात को उदाहरण द्वारा और स्पष्ट करते हैं :—

जैसे भिन्न-भिन्न प्रकार के बहुत से वृक्षों को सामूहिक रूप से वन कहते हैं तथा नदी-तालाब इत्यादि भिन्न-भिन्न जलों को जलाशय कहते हैं, उसी प्रकार भिन्न-भिन्न प्रतीत होते हुए प्रत्येक जीवगत अज्ञानों के लिए 'अज्ञान' यह एक ही शब्द व्यवहृत होता है, क्योंकि 'अजामेकाम्' यहाँ पर उस अज्ञान (अविद्या-माया) को एक ही कहा गया है । यह अज्ञान का समष्टि (सामान्य) रूप है । यह समष्टि उत्कृष्ट की अर्थात् ज्ञानात्मक चैतन्य की उपाधि है ।

ईश्वरचैतन्य—इस समष्टिभूत अज्ञान में रजोगुण तथा तमोगुण से अनभिभूत सत्त्वगुण की प्रधानता है। इस प्रकार से सत्त्वप्रधान समष्टिभूत अज्ञान से उपहित जो चैतन्य है, वह सर्वज्ञ है, (सर्वं जानाति) क्योंकि वह चराचरात्मक सम्पूर्ण प्रपञ्च का साक्षी है तथा सम्पूर्ण जीवों का कर्मानुरूप फल देने के कारण 'सर्वस्येष्टा' अर्थात् सर्वेश्वर कहलाता है, वह सम्पूर्ण जीवों के अन्तःकरण में स्थित होकर बुद्धि का नियामक होने के कारण 'सर्वं नियच्छति' अर्थात् सर्वान्तर्यामी है और सम्पूर्ण चराचरात्मक प्रपञ्च के उत्पादक विवर्त का अधिष्ठान होने के कारण ईश्वर कहलाता है तथा समष्टिभूत अज्ञान का अवभासक है। वह 'सर्वज्ञ' अर्थात् सामान्यरूप से सब कुछ जानता है तथा 'सर्ववित्' है अर्थात् विशेषरूप से कोई वस्तु उसे अज्ञात नहीं। 'यः सर्वज्ञः सर्ववित्' श्रुति इसी बात का प्रतिपादन करती है और योगवसिष्ठ में भी यही बात निम्नाङ्कित रूप से स्पष्ट की गयी है :—

'तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः' (६।४८।२३)

ईश्वर की यही समष्टि (समुदायोपाधि) सबका कारण है; अतः इसे कारणशरीर कहते हैं। इसमें आनन्द का प्राचुर्य है तथा यही समष्टिभूत अज्ञान आत्मा को कोश की तरह ढक लेता है; अतः इसे आनन्दमय कोश कहते हैं एवं जाग्रत् अवस्थाविशिष्ट जो पञ्चभूत भूतों का कार्यस्वरूप स्थूलप्रपञ्च तथा स्वप्नावस्थाविशिष्ट अपञ्चीकृतभूतों का कार्यस्वरूप जो सूक्ष्मस्वाप्नप्रपञ्च–ये दोनों इसी में विलीन होते हैं, इसीलिए इसे सुषुप्ति-स्थूलसूक्ष्मप्रपञ्च के लय का स्थान भी कहते हैं, अर्थात् कारणावस्था में प्रकृति और पुरुष से अतिरिक्त स्थूल–सूक्ष्म कार्यप्रपञ्च कुछ नहीं रहता, अतः उसमें आनन्द-बाहुल्य रहता है और जिस प्रकार त्वचा शरीर को ढके रहती है, उसी प्रकार अज्ञान आत्मा को ढक लेता है। इसलिए इसे कोश कहते हैं तथा सम्पूर्ण स्थूल-सूक्ष्म उपाधि इसी कारणोपाधि में लीन हो जाती है, अतः सुषुप्ति कहते हैं।

प्राज्ञचैतन्य—जिस प्रकार भिन्न-भिन्न बहुत से वृक्षों को जब सामूहिक रूप में कहना होता है तब उन सबको वन कहते हैं, किन्तु जब एक-एक का अलग-अलग ज्ञान कराना होता है तब आम, जामुन, पलाश इत्यादि भिन्न-भिन्न वृक्षों के नामों से पुकारते हैं, अथवा जैसे सम्पूर्ण कूप, तडागादि में जल एक ही है, अतः जल का बोध कराने के लिए सबको जलाशय कहकर उन सब में सामूहिक रूप से एकत्व व्यवहार करते हैं, किन्तु अलग-अलग बोध कराने के

लिए कूप, तड़ाग, नदी इस प्रकार भिन्न-भिन्न नामों से पुकार कर उनमें बहुत्व व्यवहार करते हैं। इसी प्रकार सकल प्रपञ्च के कारणभूत अज्ञान में समष्टि-रूप से 'अज्ञान' इस प्रकार एकत्व व्यवहार करते हैं, किन्तु जीवगत अहङ्कार आदि के कारणभूत अज्ञान को व्यष्टिरूप में (अलग-अलग) 'कई एक अज्ञान' इस प्रकार बहुत्व का व्यवहार करते हैं। यही बात 'इन्द्रो मायाभिः पुरुरूप ईयते' (इन्द्रः परमेश्वरः, मायाभिः अज्ञानैः, पुरुरूपः बहुरूपः, ईयते प्रकाशते) में स्पष्ट की गयी है। यह अज्ञान (अविद्या) का व्यष्टि (अलग-अलग) रूप है और निकृष्टि की अर्थात् जीव की उपाधि है।

समष्टि और व्यष्टि रूप में अज्ञान का यह व्यवहार इस कारण होता है कि वही एक अज्ञान (अविद्या) सामूहिक रूप से दृश्यमान सकल प्रपञ्च का हेतु है तथा अलग-अलग अहंकार आदि का भी हेतु है [जैसे सामूहिक रूप से सुवर्णपिण्ड सोना है, किन्तु अलग-अलग उसके बने हुए कटक-कुण्डल आदि भी सोना हैं।] जीवगत अहङ्कार के कारणभूत अज्ञान की इस व्यष्टि में रज-तम से अभिभूत मलिन सत्त्व की प्रधानता है। इस प्रकार के व्यष्टिरूप अज्ञान से उपहित (अविद्योपहित) जो चैतन्य है, वह अल्पज्ञ तथा अनीश्वर होने के कारण प्राज्ञ (प्रकृष्टेन अज्ञः) कहलाता है; क्योंकि यह अज्ञान के एक ही अंश का (भिन्न-भिन्न जीवगत अलग-अलग अज्ञान का) प्रकाशक है अर्थात् निकृष्टोपाधि होने के कारण ('सर्वं जानाति, सर्वं नियच्छति' इत्यादि विशेषताओं के न होने के कारण) अत्यन्त प्रकाशक नहीं, किन्तु जिस प्रकार ईश्वर चैतन्यगत अज्ञान में 'कारणशरीर' 'आनन्दमय कोश' 'सुषुप्ति' यह व्यवहार होता है, उसी प्रकार पूर्वोक्त सभी बातें प्राज्ञ चैतन्यगत अज्ञान भी व्यवहृत होता है, क्योंकि जिस प्रकार प्रलयकाल में ईश्वर चैतन्यगत अज्ञान सम्पूर्ण प्रपञ्च हिरण्यगर्भादि का उत्पादक होने के कारण 'कारणशरीर' कहलाता है, उसी अवस्था में प्रकृति-पुरुष से अतिरिक्त स्थूलसूक्ष्म प्रपञ्च कुछ नहीं रहता अतः आनन्दमय कोश कहलाता है तथा स्थूल-सूक्ष्म सम्पूर्ण उपाधियों के लीन हो जाने का आधार होने के करण सर्वप्रपञ्चमयस्थान और सुषुप्ति कहलाता है उसी प्रकार प्राज्ञ चैतन्यगत अज्ञान भी सुषुप्तिकाल में अहंकारादि शरीर का उत्पादक है, अतः कारणशरीर है। सुषुप्तिकाल में इन्द्रियाँ या उनके कोई विषय नहीं रहते, अतः कोई आसक्ति न होने के कारण आनन्दप्राचुर्य रहता है, अतः आनन्दमय है, प्राज्ञचैतन्य का आच्छादक होने के कारण 'कोश' है, एवं स्थूल-

सूक्ष्म शरीरों के लय का आधार होने के कारण स्थूलसूक्ष्मशरीरलयस्थानसुषुप्ति है, अर्थात् पञ्चीकृत स्थूलशरीर (व्यावहारिक सत्ता) अपञ्चीकृत सूक्ष्म शरीर (प्रातिभासिक सत्ता) में विलीन हो जाता है, तदनन्तर उस प्रातिभासिक सत्ता (स्वप्नप्रपञ्च) के भी अपने कारणभूत अज्ञान में लीन हो जाने के कारण सर्वोपरति हो जाती है। यही बात वाक्यसुधा में निम्नाङ्कित रूप से कही गयी है :—

लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरङ्गके।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा॥
व्यावहारिकजीवस्य लयः स्यात्प्रातिभासिके।
तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि।

(पानी में जब फेन घुल जाता है तब उसका यत्किञ्चित् अंश द्रवत्व आदि तरङ्गों में अवशिष्ट रह जाता है और जब वह सब अंश पानी में भली भाँति घुल-मिल जाता है तो पहले की तरह शुद्ध जलीयांश ज्यों का त्यों रह जाता है। इसी प्रकार पहले व्यावहारिक जीव की सत्ता प्रातिभासिक सत्ता में विलीन होती है, तदनन्तर वह प्रातिभासिक सत्ता भी विलीन हो जाती है और शुद्ध चैतन्यांशमात्र अवशिष्ट रह जाता है)।

ईश्वरप्राज्ञयोः स्वात्मानन्दानुभवः

समष्टिव्यष्ट्योरीश्वरप्राज्ञयोरभेदत्वञ्च तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवत 'आनन्दभुक् चेतोमुखः प्राज्ञः' इति श्रुतेः 'सुखमहमस्वाप्सं न किञ्चिदवेदिषमि'त्युत्थितस्य परामर्शोपपत्तेश्च। अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाऽभेदः। एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव वाऽभेदः 'एष सर्वेश्वर' इत्यादिश्रुतेः॥ ८॥

ईश्वरप्राज्ञयोः स्वात्मानन्दानुभवः—प्रलयकाले ईश्वरः सुषुप्तौ च प्राज्ञः एवमुभावप्यानन्दप्राचुर्यात् स्वात्मानन्दमनुभवतः इत्युक्तपूर्वम्। परमत्रेयं विचिकित्सा यत्प्रलयकाले सुषुप्तौ वा नैवान्तः करणम्, नापि वा तद्वृत्तिर्यया चानन्दो गृह्येत अतः कथमीश्वरेण प्राज्ञेन वा स्वात्मानन्दोऽनुभूयते एतत्समाधित्सुराह—तदानीमित्यादिः। अर्थात् अन्तःकरणवृत्तिरिव चैतन्यप्रदीप्ताज्ञानस्यापि सूक्ष्मा वृत्तयो भवन्ति, अतः स्वसूक्ष्माज्ञानवृत्तिभिरीश्वरस्तथा प्राज्ञोऽपि प्रलये

सुषुप्तौ च स्वरूपानन्दमनुभवतः। माण्डूक्योपनिषदि—'यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्—' इत्यादिना इदमेव प्रतिपादितम्। सुषुप्तावानन्दोऽनुभूयत इत्यत्र 'सुखमहमस्वाप्सम्' इति परामर्शोऽपि प्रमाणम्। शयनानन्तरमुत्थितो जीवोऽभिधत्ते 'सुखमहमस्वाप्समि'ति। एतेन स्पष्टीभवति यदस्यां दशायां यद्यप्यन्यज्ज्ञानं नासीत् तथाऽप्यहं सुखेनास्मि, इत्येतज्ज्ञानमासीत्।

विशेषः—ज्ञानं हि जीवात्मनो नैसर्गिकगुण इत्यग्नेरौष्ण्यमिव तत्तत्पार्थक्येनावस्थातुं न शक्नोति। एवञ्च सुषुप्तिदशायां बाह्यसाधनाभावादात्मनो बाह्यज्ञानं न भवति किन्त्वानन्दानुभवरूपान्तरिकं ज्ञानं जायते। अत एव साङ्ख्यदर्शने 'समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपिता' इति सूत्रे महर्षिणा कपिलेन जीवात्मनो ब्रह्मरूपिता प्रतिपादिता। यथा प्रज्वलिताग्निप्रक्षिप्तमयोगोलकमग्निसाद्भवतीति तदानीं तत्राग्निगुणस्यौष्ण्यस्य पार्थिवगुणस्य भारादेरपि च वर्तमानत्वेऽपि अयोगोलकमग्निगोलकमुपचारेणोच्यते तथैव समाधिसुषुप्तिमोक्षदशासु ब्रह्मगुणानन्दयुक्ते जीवात्मनि स्वगुणाल्पज्ञत्वादिविशिष्टेऽपि ब्रह्मत्वमुपचर्यते।

समष्टिव्यष्टिरूपाज्ञानस्य, ईश्वरप्राज्ञरूपचैतन्यस्य चाभिन्नत्वम्—समष्टिव्यष्टिरूपाज्ञानद्वयस्य वनवृक्षवज्जलाशयनदीतडागगतजलवद्वैक्यमिति तदुपहितेश्वरप्राज्ञचैतन्यद्वयस्यापि वनवृक्षावच्छिन्नाकाशवज्जलाशयनदीतडागादिप्रतिबिम्बिताकाशवद्वैक्यम्। अत एव माण्डूक्योपनिषदि, 'अयमात्मा एष सर्वेश्वरः, एष सर्वज्ञः, एषोऽन्तर्यामी'त्यादि चोच्यते। समष्टिव्यष्ट्यभिप्रायेणेश्वरगतमूलाज्ञाने संस्कारमात्रावशिष्टप्राज्ञगताज्ञाने च भेदप्रतीतावपि यथा वस्तुगत्या भेदाभावस्तथैव समष्टिव्यष्ट्युपहितेश्वरप्राज्ञचैतन्येऽपि वस्तुगत्या भेदाभावः। समष्टिरूपाज्ञानोपहितं चैतन्यमीश्वरः, व्यष्टिरूपाज्ञानोपहितं च चैतन्यं प्राज्ञ इत्युच्यते। वस्तुगत्या सुवर्णतन्निर्मितकटककुण्डलवद्, मृत्पिण्डघटशराववद्वा कारणोपाधिविशिष्टेश्वरस्य कार्योपाधिविशिष्टप्राज्ञस्य चाभेदः। कार्यकारणभेदभावाभावे 'सोऽहम्' इति ब्रह्मज्ञानमात्रमवशिनष्टि। यथा चोक्तमनुभूतिप्रकाशे :—

> 'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
> कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥ ८ ॥

(अ. प्र. २०।६१)

इसके पहले यह कहा जा चुका है कि प्रलयकाल में ईश्वर एवं सुषुप्तिकाल में प्राज्ञ दोनों ही आनन्द-प्राचुर्य होने के कारण स्वात्मानन्द अनुभव करते हैं किन्तु यह सन्देह होता है कि प्रलय तथा सुषुप्ति के समय न अन्तःकरण ही रहता है और न उसकी वृत्ति ही रहती है, जो कि आनन्द को ग्रहण कर सके। इस कारण ईश्वर या प्राज्ञ किस प्रकार स्वात्मानन्द अनुभव कर सकते हैं? इसका समाधान 'तदानीम्' इत्यादि के द्वारा करते हैं, अर्थात् अन्तःकरण की वृत्ति के समान चैतन्य प्रदीप्त अज्ञान की भी सूक्ष्म वृत्तियाँ होती हैं, अतः अपनी-अपनी अस्पष्ट (सूक्ष्म) अज्ञानवृत्तियों के द्वारा ईश्वर एवं प्राज्ञ भी प्रलय तथा सुषुप्ति अवस्था में स्वरूपानन्द का अनुभव करते हैं। यही बात माण्डूक्योपनिषद् में भी कही गयी है :—

'यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दमयी ह्यानन्दभुक् चेतोमुखः प्राज्ञः (चैतन्यदीप्ताज्ञानवृत्तिप्रधानः)।'

सुषुप्ति दशा में आनन्दानुभव होता है, इसका दूसरा प्रमाण भी देते हैं—'सुखमहमस्वाप्सम्...' अर्थात् सोकर उठने के पश्चात् जीव कहता है 'मैं बड़े सुख से सोया' इससे स्पष्ट होता है कि उस दशा में उसे यद्यपि अन्य बातों का ज्ञान न था, पर इस बात का ज्ञान था कि मैं सुखपूर्वक (आनन्द से) हूँ।

विशेष—ज्ञान, जीवात्मा का स्वभाविक गुण है। वह उससे उसी प्रकार अलग नहीं हो सकता, जैसे अग्नि से उष्णता। अतः सुषुप्ति दशा में बाह्य-साधनों का अभाव होने के कारण यद्यपि आत्मा को बाह्यज्ञान नहीं होता पर आनन्दानुभव रूप आन्तरिक ज्ञान होता है। इसी कारण साङ्ख्यदर्शन के 'समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपिता' इस सूत्र में महर्षि कपिल ने यह स्पष्ट किया है कि इस तीनों दशाओं में आनन्दानुभव के कारण आत्मा ब्रह्मरूपिता को प्राप्त हो जाता है, अर्थात् उस दशा में जीवात्मा भी ब्रह्म कहलाता है। ऐसी दशा में जीव को ब्रह्मरूपिता कैसे प्राप्त होती है? यह निम्नलिखित उदाहरण से और अधिक स्पष्ट हो जायगा—

लोहे के गोले को यदि भयानक अग्नि में डाल दें तो वह लाल हो जायगा। उस समय उसमें अग्नि का गुण उष्णता भी है और अपने पार्थिव गुण 'भार' इत्यादि भी हैं। इसी प्रकार समाधि, सुषुप्ति और मोक्ष दशा में जीवात्मा में ब्रह्म का गुण 'आनन्द' आ जाता है, पर अपने गुण 'अल्पज्ञत्वादि'

भी रहते हैं। अतः ऐसी दशा में जीव को औपचारिक ब्रह्म (वास्तविक नहीं) कहते हैं। किन्तु इस प्रकार जीव को ब्रह्म कहना वैसे ही है, जैसे तपे हुए गोले को, आग के गुण दाहकत्व-विशिष्ट होने के कारण, आग कहना। इससे यह स्पष्ट होता है कि प्रलय तथा सुपुप्ति दशा में ईश्वर तथा प्राज्ञ अपनी अज्ञान-वृत्तियों के द्वारा आनन्द का अनुभव करते हैं।

समष्टि-व्यष्टिरूप अज्ञान की तथा ईश्वर-प्राज्ञ की एकता—समष्टिरूप तथा व्यष्टिरूप उपर्युक्त दोनों प्रकार के अज्ञान उसी प्रकार एक हैं, जैसे वन और वृक्ष या जलाशय एवं नदी, तडागादि। उनसे उपहित ईश्वर एवं प्राज्ञ भी उसी प्रकार एक हैं, जैसे वनगत आकाश एवं वृक्षगत आकाश अथवा जलाशय में प्रतिबिम्बित आकाश या नदी, तडागादि में प्रतिबिम्बित आकाश। कारण माण्डूक्योपनिषद् में आत्मा को 'एष सर्वेश्वरः' 'एष सर्वज्ञः' 'एषोऽन्तर्यामी' इत्यादि कहा गया है अर्थात् समष्टि और व्यष्टि अभिप्राय से ईश्वरगत मूल अज्ञान एवं प्राज्ञगत अज्ञान में यद्यपि भेद प्रतीत होता है, पर वास्तविक भेद कोई नहीं, इसी प्रकार पूर्वोक्त समष्टि-व्यष्टिरूप अज्ञानोपहित ईश्वर और प्राज्ञ में भी वास्तविक कोई भेद नहीं समष्टि रूपाज्ञानोपहित चैतन्य की ईश्वर संज्ञा है, एवं व्यष्टिरूपाज्ञानोपहित चैतन्य की प्राज्ञ संज्ञा है। दूसरे शब्दों में यों कहिये कि जिस प्रकार सुवर्णपिण्ड कारण और उससे बने हुए कटक-कुण्डलादि कार्य हैं, उसी प्रकार कारणोपाधिविशिष्ट की ईश्वर एवं कार्योपाधिविशिष्ट की प्राज्ञ (जीव) संज्ञा है, पर वास्तव में स्वर्ण तथा उससे बने हुए कटक-कुण्डलादि की तरह ही दोनों अभिन्न हैं और जब कार्य-कारणरूप भेदभाव दूर हो जाता है तो 'सोऽहम्' यह ब्रह्मज्ञानरूप पूर्ण बोधमात्र अवशिष्ट रह जाता है। अनुभूति-प्रकाश में यही बात निम्नाङ्कित रूप से कही गयी है :—

'कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥ ८ ॥' (अ० प्र० १०–६२)

तुरीयचैतन्यम्

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाऽऽधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते 'शिवमद्वैतं चतुर्थं मन्यन्ते' इत्यादिश्रुतेः। इदमेव तुरीयं

शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ॥ ८ ॥

तुरीयचैतन्यम्—पूर्वोक्तप्रकारेणोपाध्यवच्छिन्नेश्वरप्राज्ञौ निरूप्येदानीं वनवृक्षेत्यादिनाऽनवच्छिन्नचैतन्यं निरूपयति। वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयतडागादितद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतो यथा महाकाशस्तथैवेश्वरप्राज्ञयोरप्याधारभूतमनुपहितं सर्वव्यापि यद्विशुद्धचैतन्यं तत्तुरीयमुच्यते, एतदेव 'शिवमद्वैतं चतुर्थं मन्यन्ते' तथा—'त्रिपु धामसु यद्भोग्यमि'त्यादिना... श्रुतिभिरपि प्रतिपादितम्। एतदेव विशुद्धचैतन्यं पूर्वोक्ताज्ञानादितदुपहितचैतन्येश्वरप्राज्ञचैतन्यद्वयेन सहाभेदविवक्षायां 'तत्त्वमसी'त्यस्य वाच्यार्थत्वं भेदविवक्षायाञ्च लक्ष्यार्थत्वं भजते। चैतन्यरूपेण त्रयाणां चैतन्यानां यद्यप्येकत्यमेव तथापि अज्ञानानवच्छिन्नत्वेन वाच्यत्वं तदवच्छिन्नत्वेन च लक्ष्यत्वमुपपद्यते। अनयोरज्ञानोपहितचैतन्येश्वरप्राज्ञयोर्विशुद्धचैतन्येन सह तथैक्यभिन्नत्वव्यपदिष्टिर्यथाऽग्निप्रक्षिप्तायोगोलके सत्यपि भारादिपार्थिवांशेऽग्निगुणदाहकताशक्तिसम्पन्नतयाऽग्निगोलकव्यवहृतिस्तथा तेन दाहे सञ्जाते सत्ययो दहतीति व्यवहारः ॥ ९ ॥

तुरीय[1] (विशुद्ध) चैतन्य—जिस प्रकार वन में वर्तमान आकाश तथा वृक्ष में वर्तमान आकाश एवं जलाशयगत आकाशप्रतिबिम्ब तथा नदी तडागादिगत आकाशप्रतिबिम्ब का आधारभूत महाकाश है, उसी प्रकार ईश्वर चैतन्य तथा प्राज्ञ चैतन्य का आधारभूत उपाधिरहित सर्वव्यापि विशुद्ध चैतन्य है, उसको तुरीय (चतुर्थ) कहते हैं। यही बात 'शिवमद्वैतं चतुर्थं मन्यते' तथा—

त्रिपु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदा शिवः ॥

इत्यादि श्रुतियों में स्पष्ट की गयी है। अज्ञानोपहित पूर्वोक्त ईश्वर तथा प्राज्ञचैतन्य एवं इस विशुद्धचैतन्य की एकता ही 'तत्त्वमसि' इस महावाक्य का वाच्यार्थ है और प्राज्ञेश्वर चैतन्य की अपेक्षा विशुद्ध चैतन्य की भिन्नता

१. अविद्या ईश्वर एवं प्राज्ञ से चौथा होने के कारण इसे तुरीय कहते हैं। किसी-किसी का मत है कि यह विश्व, तैजस और प्राज्ञ से चौथा होने के कारण तुरीय कहलाता है।

उसका लक्ष्यार्थ है। इन अज्ञानोपहित चैतन्य (प्राज्ञेश्वर चैतन्य) और विशुद्ध चैतन्य में एकता तथा भिन्नता का व्यवहार उसी प्रकार होता है, जैसे आग में पड़ कर अत्यन्त लाल हो गये लोहे के गोले में भारादि पार्थिवांश के रहते हुए भी अग्नि के गुण दाहकताशक्ति सम्पन्न होने के कारण उसे आग का गोला कहते हैं तथा उससे जल जाने पर 'अयो दहति' (लोहे का गोला जलाता है) यह व्यवहार करते हैं॥ ९॥

अज्ञानस्यावरणविक्षेपशक्तिद्वयी

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम्। आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायततमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम्। तदुक्तम्—

'घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः।
तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा' इति॥

अनयैवावरणशक्त्यावच्छिन्नस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसंसारभावनाऽपि सम्भाव्यते यथा स्वाज्ञानावृतायां रज्ज्वां सर्पत्वसम्भावना।

विक्षेपशक्तिस्तु तथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चादिमुद्भावयति तादृशं सामर्थ्यम्। तदुक्तम्—

'विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदि'ति॥ १०॥

नन्वात्मनः स्वप्रकाशचैतन्यस्वरूपत्वे कथं तत्र स्वविषयकाज्ञानम्? कथं वा संसारासक्त्याद्युदासीनस्य तस्याकाशादिप्रपञ्चजनकत्वमित्यत आह—अस्येति। तत्रावरणविक्षेपनामकशक्तिद्वये आवरणशक्तिमादौ निरूपयति—आवरणेति।

आवरणशक्तिः—स्वशक्त्या प्रमातुर्दृष्टिमवष्टभ्य सच्चिदानन्दस्वरूपपिधायिका शक्तिरावरणशक्तिः। यथा स्वल्पोऽपि पयोदखण्डः समक्षमागत्यानेकयोजनमायतमप्यादित्यमण्डलमवलोकयितृनेत्रपथोऽवरुणद्धि तथैवाज्ञानस्य परिच्छिन्नत्वेऽपि स्वावरणशक्त्या तत्प्रमातृबुद्धिमावृत्यापरिच्छिन्नमसंसारिणमात्मानं तद्दृष्टेरवरुणद्धि। वस्तुगत्या स आत्मा नित्योपलब्धिस्वरूप इति न केनापि कदापि कथमपि पिधातुं शक्यो नापि च सांसारिकबन्धनैर्बद्धुं शक्यः। केवलं

मूर्खबुद्ध्यैव स तथा प्रतीयते। हस्तामलके—'घनच्छदृष्टिर्घनच्छन्नमर्कम्…' इत्यादिना अयमेव भावः स्पष्टीकृतः।

अज्ञानस्यानयैवावरणशक्त्या युक्त आत्मा सांसारिकविषयेषु कर्तृत्वभोक्तृत्व-सुखित्वदुःखित्वादिकं च भजते किन्त्वेतत्सर्वं रज्जावहिविभावनमिव मिथ्या। वस्तुगत्या नामरूपात्मकमखिलं जगद् ब्रह्मैव संसारबुद्धिश्च तदज्ञाननिबन्धनैवेति बोध्यम्।

विक्षेपशक्तिः—ब्रह्मणः प्रभृति स्थावरपर्यन्तस्याखिलनामरूपात्मकजगतः समुत्पादिका शक्तिर्विक्षेपशक्तिः। यथा रज्जुविषयकमज्ञानं स्वशक्त्याऽज्ञानावृत-रज्जावहिं विभावयति तथैवात्मविषयकज्ञानमात्मशक्त्याऽज्ञानवृतात्मनि विक्षेप-शक्त्या सूक्ष्मशरीरादारभ्य ब्रह्माण्डपर्यन्तमाकाशादिप्रपञ्चमुद्भावयति। दृग्दृश्य-विवेकेऽज्ञानशक्तिद्वय्येषा—'शक्तिद्वयं हि मायाया विक्षेपावृत्तिकारणम्'—इत्यादिना निर्दिष्टः॥ १०॥

अज्ञान की दो शक्तियाँ—[यदि आत्मा स्वयंप्रकाश एवं चैतन्यस्वरूप है तो यह अपने स्वरूप को क्यों नहीं पहचान पाता? वह आत्मा निरीह एवं असङ्गोदासीन है तो फिर इस आकाशादि प्रपञ्च को क्यों रचता है? इन दोनों शङ्काओं का समाधान करने के लिए यहाँ अज्ञान (अविद्या, माया) की शक्तियों का निरूपण किया जाता है]

इस अज्ञान की दो शक्तियाँ हैं—(१) आवरणशक्ति (२) विक्षेपशक्ति।

आवरणशक्ति—प्रमाता की दृष्टि के आगे पर्दा डाल कर सच्चिदानन्द-स्वरूप को ढक देनेवाली शक्ति को आवरणशक्ति कहते हैं। जिस प्रकार एक छोटा सा मेघ का टुकड़ा आँख के सामने आकर अनेक योजन विस्तृत सूर्य को भी दर्शक की आँखों के आगे से ढक लेता है और वह उसे दिखलाई नहीं देता, उसी प्रकार अज्ञान यद्यपि परिच्छिन्न है, तथापि उसमें ऐसी शक्ति है कि वह प्रमाता की बुद्धि के आगे अपना पर्दा डाल कर अपरिच्छिन्न एवं असंसारी आत्मा को उसकी दृष्टि से ढक लेता है। वास्तव में आत्मा नित्योपलब्धि-स्वरूप है—किसी से कभी छिप नहीं सकता और न कभी सांसारिक बन्धनों में बँध सकता है, किन्तु मूर्ख व्यक्ति उसको बँधा हुआ समझता है यही भाव 'घनच्छन्नदृष्टिर्घनच्छन्नमर्कं …' इत्यादि श्लोक के द्वारा 'हस्तामलक' में अभिव्यक्त किया है। अविद्या की इसी शक्ति (आवरणशक्ति) से युक्त आत्मा अपने आपको सांसारिक विषयों का कर्त्ता, भोक्ता एवं सुखी, दुःखी आदि

समझता है, परन्तु यह सब रस्सी में सर्पाभास की तरह मिथ्या है। वास्तव में यह नाम रूपात्मक सब जगत् ब्रह्म ही है, फिर भी उसका वास्तविक ज्ञान न होने के कारण इसमें अज्ञानी व्यक्तियों की सांसारिक बुद्धि रहती है।

विक्षेपशक्ति—ब्रह्म से लेकर स्थावरपर्यन्त सम्पूर्ण नामरूपात्मक जगत् को पैदा करनेवाली शक्ति को विक्षेपशक्ति कहते हैं। जिस प्रकार रज्जुविषयक अज्ञान अपनी शक्ति से अज्ञानावृत रस्सी में सर्पत्व की भावना उत्पन्न कर देता है, उसी प्रकार आत्मविषयक अज्ञान अपने सामर्थ्य से अज्ञानावृत आत्मा में विक्षेपशक्ति के द्वारा सूक्ष्मशरीर से लेकर ब्रह्माण्डपर्यन्त आकाशादि प्रपञ्च की उद्भावना कर देता है। 'दृग्दृश्यविवेक' में पूर्वोक्त दोनों शक्तियों का निर्देश इस प्रकार किया गया है :—

'शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम्।
विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत्॥
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम्'॥ १०॥

आत्मनः संसारकारणत्वम्

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति॥ ११॥

नन्वात्मा संसारस्य निमित्तं कारणमाहोस्विदुपादानम्? निमित्तकारणत्वे 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति तैत्तिरीयोक्तं तस्य कार्यव्यापित्वं न स्यात्—निमित्तस्य दण्डादेः स्वकार्यघटादिव्यापित्वाभावदर्शनात्।

नित्यचैतन्यस्य परमात्मनः उपादानकारणत्वे तु 'कारणगुणाः कार्यगुणानारभन्ते' इति नियमेन सांसारिकजडप्रपञ्चस्यापि नित्यत्वं चेतनत्वञ्चोपपद्येतेत्युभयोर्न कतरदपि सम्भवतीत्यत आह—शक्तिद्वयवदिति। एक एव चेतनात्मा संसारस्य निमित्तमुपादानञ्चोभयं कारणमिति भावः। तदेवोर्णनाभिदृष्टान्तेन स्पष्टीक्रियते—यथा लूता (ऊर्णनाभिः) स्वतन्तुरूपकार्यं प्रति चैतन्यप्रधानतया निमित्तकारणम्, स्वशरीरप्रधानतया चोपादानकारणम् एवमज्ञानोपहितात्मा चैतन्यप्रधानतया सांसारिकप्रपञ्चस्य निमित्तं कारणम् अज्ञानप्रधानतया चोपादानकारणम्। निश्चेतनलूतातनुस्तन्तुं जालं वा निष्पादयितुं न शक्नोति।

तत्त्वभावे च केवलेन चैतन्यांशेनापि तन्तुजालयोरन्यतरदुत्पादयितुं न शक्यते-ऽस्तस्तन्तुजालरूपकार्यं प्रति लूतायास्तनुचैतन्ययोरुभयोः कारणत्वेऽपि चैतन्य-प्राधान्येन तनोर्निमित्तत्वम्—चैतन्याभावे केवलया तन्वा तन्तुजालनिष्पादना-सम्भवात्। तनुप्राधान्ये च तस्याः साक्षात्सम्बन्धितयोपादानत्वम्। एवं शरीर-निष्ठस्यात्मनोऽपि परम्परया तन्तोर्जालस्य चोपादानत्वम्। अनयैव रीत्या ईश्वरः चैतन्यप्राधान्येन चराचरजगतो निमित्तकारणम्, अज्ञानप्राधान्येन चोपादान-कारणम्। यतो हि जगदज्ञान-(माया)-जन्यम्। अज्ञानं (माया) च संसार-स्योपादानकारणम्। अज्ञानञ्चात्मनिष्ठमिति मायाविन ईश्वरस्यापि परम्परया जगदुपादानत्वं न विरुध्यते। यथा लूता जालं तन्तुं वा तूलतुरीवेमादिबाह्य-साधनान्यनपेक्ष्यैव निर्मातुं शक्नोति तथैवेश्वरोऽपि सृष्टेरादावेको निःसहायो-ऽद्वितीयोऽपि स्वमायया सूक्ष्मशरीरादारम्याब्रह्माण्डान्तं स्थूलजगदुत्पादयति। एतदेव मुण्डकोपनिषदि 'यथोर्णनाभिरि'त्यादिना प्रतिपादितम्।

एवमीश्वरस्य जगतो निमित्तत्वेऽपि 'तत्सृष्ट्वा तदेवानुप्राविशत्' इत्यादि-श्रुतीनामुपादानपरकत्वेनाविरोधः तथात्वे च श्रुतेः परिणामपरकत्वेन (नापि विवर्तपरकत्वेन) जगतो नित्यत्वं चेतनत्वञ्च वार्यत इति सर्वमनवद्यम्। इदमत्रावधेयम्—इदं चराचर जगद् ब्रह्मणो विवर्तो न परिणामः। अतोऽस्य प्रधानकारणाज्ञानापेक्षया (मायापेक्षया) परम्परया सम्बद्धस्य ब्रह्मण उपा-दानत्वेऽपि नास्मिंस्तद्गुणचैतन्यनित्यत्वादिसम्भवः, स्वरूपापरित्यागेन स्वरूपा-न्तरप्रदर्शकत्वस्यैव हि विवर्तकत्वात्; चैतन्यनिष्ठरज्जुविषयकाज्ञानस्य रज्जुस्व-रूपापरित्यागेन सर्पस्वरूपान्तरप्रदर्शनवत्। इत्थं चैवमेवेश्वरचैतन्यनिष्ठाज्ञान-शक्तेरपि चैतन्यस्वरूपपरित्यागेनाकाशादिस्वरूपान्तराकारेणास्य जगतः प्रदर्शक-त्वादस्य प्रपञ्चस्य नित्यत्वं न सम्भवति। अज्ञानस्य स्वतो मिथ्यात्वेन तज्ज-न्याकाशादेरपि मिथ्यात्वात् ॥ ११ ॥

[एतावता ग्रन्थेनाज्ञानस्यावरणशक्तिकृत्यरूपं चैतन्यस्य जगतः कारणत्वं, जगतश्च चैतन्यकार्यत्वं निरूप्याधुना तदज्ञानविक्षेपशक्तिकृत्यरूपतज्जगद्रूपिकार्यो-त्पत्तिप्रकारो निर्दिश्यते]

आत्मा संसार का निमित्तकारण है या उपादान? यदि निमित्तकारण माना जायगा तो ठीक नहीं क्योंकि 'तत्सृष्ट्वा तदेवानुप्राविशत्' इस तैत्तिरीय उपनिषत् के वाक्य से पता चलता है कि वह आत्मा अपने कार्य में भी व्याप्त

है किन्तु कार्य में निमित्तकारण व्याप्त नहीं होता, अन्यथा दण्ड भी घटव्याप्त मानना पड़ेगा। अतः आत्मा संसार का निमित्त कारण नहीं हो सकता।

यदि कहा जाय कि उपादानकारण है तो वह भी ठीक नहीं प्रतीत होता क्योंकि यदि चेतन आत्मा संसार का उपादान का कारण माना जायगा तो 'कारणगुणा हि कार्यगुणानारभन्ते' इस नियम से कारण के गुण कार्य में भी होने के कारण यह सांसारिक जड़-प्रपञ्च भी चेतन तथा नित्य हो जायगा—तब इसे नश्वर नहीं कह सकते। इस शंका को 'शक्तिद्वयवत्' इत्यादि के द्वारा दूर करते हैं, अर्थात् एक ही चेतन आत्मा संसार का निमित्तकारण तथा उपादानकारण दोनों है। इस बात को मकड़ी के उदाहरण द्वारा स्पष्ट करते हैं:-

जिस प्रकार एक मकड़ी अपने तन्तुरूप कार्य के प्रति चैतन्यप्रधानता के कारण निमित्तकारण है और अपने शरीर की प्रधानता के कारण उपादानकारण भी है, उसी प्रकार अज्ञानोपहित आत्मा चैतन्यप्रधानता के कारण सांसारिक प्रपञ्च का निमित्तकारण है तथा अज्ञानप्रधानता के कारण उपादान कारण है।

यदि मकड़ी में चेतनता न हो तो केवल शरीर से तन्तु या जाल नहीं बन सकता और यदि शरीर न हो तो केवल चैतन्यांश से भी तन्तु या जाल नहीं बन सकता। इस कारण तन्तु या जालरूपी कार्य में मकड़ी के चैतन्यांश एवं शरीर दोनों कारण हैं। अन्तर यही है कि चैतन्यप्रधानता के कारण शरीर निमित्तकारण है—यदि चेतनता न हो तो जड़ देह से तन्तु या जाल नहीं बन सकता और शरीरप्रधानता के कारण वही मकड़ी उपादानकारण भी है क्योंकि शरीर का साक्षात् सम्बन्ध है। इस प्रकार शरीरनिष्ठ आत्मा भी तन्तु या जाल का उपादानकारण है। इसी प्रकार ईश्वर भी अपनी चैतन्य प्रधानता के कारण चराचर जगत् का निमित्तकारण है और अज्ञानप्रधानता के कारण उपादानकारण है क्योंकि जगत् अज्ञान (माया) जन्य है—माया संसार का उपादानकारण है और अज्ञान (माया) आत्मनिष्ठ है, अतः मायावी ईश्वर को परम्परया जगत् का उपादानकारण कहने में कोई बाधा नहीं। जिस प्रकार मकड़ी अपने तन्तु एवं जाल को कपास तथा तुरी वेमादि बाह्य-साधनों के बिना भी तैयार कर लेती है, उसी प्रकार ईश्वर भी सृष्टि के पहले एक ही, अद्वितीय, निःसहाय बिना किसी बाह्य साधन के भी अपनी

मायाशक्ति के द्वारा सूक्ष्मशरीर से लेकर ब्रह्माण्डपर्यन्त स्थूल जगत् की रचना कर डालता है। यही बात मुण्डक उपनिषद् में निम्नलिखित रूप से कही गयी है :—

'यथोर्णनाभिः सृजते गृह्णते च, यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात्केशलोमानि, तथाऽक्षरात्सम्भवतीह विश्वम् ॥'

अब कदाचित् यह सन्देह हो कि यदि ईश्वर संसार का निमित्तकारण है तो उसको कार्यव्यापिता न होने के कारण 'तत्सृष्ट्वा तदेवानुप्राविशत्' यह श्रुति कैसे चरितार्थ होगी, तो इसका उत्तर यह है कि यह श्रुति उपादान-कारण-विषयक है अर्थात् उपादानकारणरूप से आत्मा सब में प्रविष्ट है, किन्तु यदि फिर भी यह शंका हो कि यदि ईश्वर उपादानकारणरूप से सब में व्याप्त है तो यह चराचर जगत् जड़ एवं नश्वर नहीं हो सकता, क्योंकि इसका उपादान चेतन तथा अविनाशी है तो इसका समाधान यह है कि पूर्वोक्त श्रुति परिणामविषयक है—विवर्तविषयक नहीं अर्थात् जो जिसका परिणाम होता है (जैसे दही दूध का परिणाम है) उसमें उपादानकारण के गुण अवश्य रहते हैं, किन्तु जो जिसका विवर्त होता है (जैसे रस्सी में सर्प का भान) उसमें उस कारण के गुण नहीं रह सकते। यह चराचर जगत् ब्रह्म का विवर्त है, परिणाम नहीं। अतः इसके प्रधान कारण अज्ञान (माया) की अपेक्षा परम्परया सम्बन्धित ब्रह्म के उपादानकारण होने पर भी इसमें ब्रह्म के गुण चेतनता एवं नित्यता नहीं रह सकते। विवर्त का लक्षण ही यह है कि जो अपने रूप का भी परित्याग न करे और दूसरे रूप को भी प्रदर्शित करे वह विवर्त है। चैतन्यनिष्ठ रस्सी-विषयक अज्ञान रस्सी के रूप का परित्याग न करता हुआ सर्परूपी दूसरे रूप को भी प्रदर्शित करता है, उसी प्रकार ईश्वरचैतन्यनिष्ठ अज्ञानशक्ति भी चैतन्यस्वरूप का परित्याग न करती हुई आकाशादि दूसरे रूपों को भी प्रदर्शित करती है। अतः आकाशादि प्रपञ्च नित्य नहीं हो सकता, क्योंकि अज्ञान स्वतः मिथ्या है। इस कारण तज्जन्य प्रपञ्च भी मिथ्या है ॥ ११ ॥

[यहाँ तक अज्ञान की आवरणशक्ति का काम बतलाया गया, अर्थात् यह निरूपण किया गया कि चैतन्य ही जगत् का कारण है, जगत् उसका कार्य है, अब आगे विक्षेपशक्ति का काम (जगत्रूपी कार्य की उत्पत्ति) बतलाया जायगा]।

सृष्टिक्रमः

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत' इत्यादिश्रुतेः। तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य। तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते। एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते। एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते॥ १२॥

तमोगुणप्रधानात् किन्तु यत्किंचिद्रजःसत्त्वसत्तासम्पन्नाद्, विक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः, आकाशाद्वायुः, वायोरग्निः, अग्नेर्जलम्, जलात्पृथिवी चोत्पद्यते। आकाशादेर्जडत्वात्तमोगुणप्रधानविक्षेपशक्तिसम्पन्नाज्ञानोपहितचैतन्यस्यैवाकाशादिप्रपञ्चजनकत्वं युक्तम्—'कारणगुणा हि कार्यगुणानारभन्ते' इति नियमात्, तथा च श्रुतिः—'तस्माद्वा एतस्मादात्मन-आकाशः सम्भूतः। एतेन देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति श्रुत्याऽज्ञानस्य (मायायाः) गुणत्रययुक्तत्वेऽपि तमोगुणप्राधान्यादेव कथमाकाशाद्युत्पत्तिरिति शङ्काप्यपास्ता। एवमाकाशादुत्पत्त्यनन्तरं स्वकारणगुणानुरूपमुत्तरोत्तरं तेष्वाकाशादिषु सत्त्वरजस्तमसां त्रयाणामपि गुणानामुत्पत्तिः। एतान्येवापञ्चीकृतसूक्ष्मरूपपञ्चभूतानि तथा क्रमशः शब्दस्पर्शरूपरसगन्धतन्मात्रा उच्यन्ते। एभ्य एव सूक्ष्मभूतेभ्यः (अपञ्चीकृतपञ्चभूतेभ्यः) अपञ्चीकृतसूक्ष्मशरीराणि तथा पञ्चीकृतस्थूलभूतेभ्यः स्थूलशरीराणि चोत्पद्यन्ते॥ १२॥

पञ्चमहाभूतोत्पत्ति—तमोगुणप्रधान किन्तु रज और सत् की भी यत्किञ्चित् सत्ता से युक्त विक्षेप-शक्ति-सम्पन्न अज्ञानोपहित चैतन्य से आकाश की उत्पत्ति होती है। आकाश से वायु, वायु से अग्नि, अग्नि से जल और जल से पृथिवी की उत्पत्ति होती है। निम्नलिखित श्रुति इसमें प्रमाण है :—

'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः'।

यहाँ यद्यपि यह शंका हो सकती है कि "देवात्मशक्तिं स्वगुणैर्निगूढाम्' से यह प्रमाणित होता है कि अज्ञान (माया) तीनों गुणों से युक्त है, अतः आकाशादि की उत्पत्ति तमोगुण की प्रधानता से हुई, यह कैसे निश्चित हो सकता है, परन्तु इसका समाधान यह है, कि आकाशादि कार्य जड़ है, इसलिये कारण-गुण-न्याय से तमोगुण-प्रधान विक्षेपशक्तियुक्त ही चेतन को आकाशादि

प्रपञ्च का कारण मानना ठीक है, आकाशादि की उत्पत्ति होने पर अपने-अपने कारण-गुण के अनुरूप उत्तरोत्तर उन आकाशादि में सत्, रज, तम तीनों ही गुण उत्पन्न होते हैं। इन्हीं आकाश, वायु, अग्नि, जल और पृथ्वी को अपञ्चीकृत सूक्ष्मरूप पञ्चभूत तथा क्रमशः शब्दतन्मात्रा, स्पर्शतन्मात्रा, रूपतन्मात्रा रसतन्मात्रा तथा गन्धतन्मात्रा कहते हैं। इन्हीं सूक्ष्मभूतों (अपञ्चीकृत पञ्चभूतों-पञ्चतन्मात्राओं) से अपञ्चीकृत सूक्ष्मशरीर तथा पञ्चीकृत स्थूलभूतों से स्थूलशरीर उत्पन्न होते हैं ॥ १२ ॥

सूक्ष्मशरीरोत्पत्तिः

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी, कर्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति। ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुजिह्वाघ्राणाख्यानि। एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः, मनो नाम संकल्पविकल्पात्मिकाऽन्तःकरणवृत्तिः। अनयोरेव चित्ताहङ्कारयोरन्तर्भावः। एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते। एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम्। इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति। अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी व्यवहारिको जीव इत्युच्यते। मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति। कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि, एतानि पुनराकाशादीनां रजोंऽशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते। वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती। अपानो नामार्वाग्गमनवान्पाय्वादिस्थानवर्ती। व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती। उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः। समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः। केचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति। तत्र नाग उद्गिरणकरः, कूर्म उन्मीलनकरः, कृकलः क्षुत्करः, देवदत्तो जृम्भणकरः, धनञ्जयः पोषणकरः। एतेषां प्राणादिष्वन्तर्भावात्प्राणादयः पञ्चैवेति केचित्। एतत्प्राणादिपञ्चकमाकाशादिगतरजोंऽशेभ्यो मिलितेभ्यः उत्पद्यते। इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंऽशकार्यत्वम् एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्राणमयः क्रिया-

शक्तिमान् कार्यरूपः। योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति। एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते ॥ १३ ॥

सूक्ष्मशरीराणां सप्तदश अवयवाः। इमान्येव सूक्ष्मशरीराणि लिङ्गशरीराण्युच्यन्ते—लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भाव एभिरिति लिङ्गानि च तानि शरीराणि इति लिङ्गशरीराणि इति व्युत्पत्तेः। 'सप्तदशः प्रजापतिः' इत्यत्र शतपथब्राह्मणे 'मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम्' इत्यत्र सङ्क्षिप्तशारीरकभाष्ये चापि सूक्ष्मशरीरस्य सप्तदशावयवत्वप्रतिपादनात्। तानि च सूक्ष्मशरीराणि—'पञ्चप्राणमनोबुद्धिः' इत्यादीनि। तेषु च प्राणपञ्चकज्ञानकर्मोभयेन्द्रियदशकबुद्धिमनसामाकाशादिसात्त्विकांशेभ्यः क्रमशः पृथक् पृथगुत्पत्तिः। आकाशीयसात्त्विकांशात् श्रोत्रस्य, वायवीयसात्त्विकांशात् त्वचः, तैजससात्त्विकांशात् चक्षुषः, जलीयसात्त्विकांशाद्रसनायाः, पार्थिवसात्त्विकांशात् घ्राणस्य चोत्पत्तिरिति भावः।

तत्र 'अहं ब्रह्मैवास्मि', 'इदमित्थमे'वंनिश्चयात्मिकान्तःकरणवृत्तिर्बुद्धिः। इदमित्थं न वा। (अहं चेतनस्वरूपं शरीरं वा) इति संशयात्मिकान्तःकरणवृत्तिर्मनः। स्मरणात्मकचित्तस्य बुद्धौ गर्वात्मकाहंकारस्य च मनस्येवान्तर्भाव इति न पार्थक्येन तयोर्लक्षणमुक्तम्। मनोबुद्धिचित्ताहंकाराणां चतुर्णामेकं मिलितमन्तःकरणं नाम। तस्यैकत्वेऽपि संशयनिश्चयस्मरणगर्वरूपविभिन्नकार्यपरतया भिन्नकार्यपरत्वेन पाठकपाचकयाचकवद् व्यवहारः। एतानि च सर्वाणि व्योमादिगतसात्त्विकांशेभ्यो मिलितेभ्यः समुत्पद्यन्ते। तत्र मनोबुद्धिचित्ताहंकाराः प्रकाशात्मकाः, एतदेवैतेषां महाभूतसात्त्विकांशकार्यत्वे प्रमाणम्।

ज्ञानेन्द्रियसहिताबुद्धिर्विज्ञानमयः कोश उच्यते तद्युक्तं चैतन्यं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन स्वर्गादिलोकगामि भवति। व्यावहारिकदशायाञ्चैतदेव विज्ञानमयकोशयुक्तं चैतन्यं जीवसंज्ञां लभते।

सत्त्वगुणांशोत्पन्नत्वेन सत्त्वगुणप्रधानं, चक्षुःश्रोत्रादिज्ञानेन्द्रियसहितञ्च मनोमयकोशः कथ्यते। मनसः सत्त्वगुणांशकार्यत्वेऽपि रजोविकारेच्छारूपित्वेन संकल्पविकल्पात्मकत्वाद् बुद्ध्यपेक्षयाऽधिकजडत्वाच्चास्मिन्नेव व्यवहारः। बुद्धेश्च निश्चयान्तःकरणवृत्तित्वेन तत्र सङ्कल्पविकल्पाभावात्। आत्मनश्च कोशवदाच्छादकत्वादस्मिन् कोशत्वव्यवहारः।

वागादिकर्मेन्द्रियपञ्चकमाकाशादिरजोगुणांशेभ्यः क्रमशः पार्थक्येनोत्पद्यते। आकाशादिषु सत्त्वरजस्तमसां त्रयाणामपि गुणानां वर्तमानत्वेऽपि वागादिष्वा-

काशादिरजोंऽशाधिक्यमिति रजोगुणप्रधानाकाशाद् वागिन्द्रियम्, रजोगुणप्रधान-वायोः पाणीन्द्रियम्, रजोगुणप्रधानाग्नेः पादेन्द्रियम् तथा रजोगुणप्रधान-जलान्मलविसर्जनेन्द्रियम् एवं रजोगुणप्रधानपृथिव्या मूत्रविसर्जनेन्द्रियञ्चोत्पद्यते।

प्राणादयः पञ्चवायवः। साङ्ख्यमते नागकूर्मकृकलदेवदत्तधनञ्जयाख्या अपरेऽपि पञ्च वायवः; तेषु च—

'उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः।
कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे।
न जहाति मृतं वापि सर्वव्यापी धनञ्जयः॥'

किन्तु वेदान्तिन इमान् सर्वान् प्राणादिष्वेवान्तर्भावयन्ति।

अस्य प्राणपञ्चकस्योत्पत्ती रजोगुणप्रधानाकाशादिमिलितांशेभ्यो भवति। कर्मेन्द्रियसहितं तत्प्राणपञ्चकं प्राणमयकोशः कथ्यते। एतच्च क्रियात्मकमित्य-स्य रजोगुणांशकार्यत्वम्। पूर्वोक्तविज्ञानमय-मनोमय-प्राणमयकोशेषु विज्ञानमयः कोशो ज्ञानशक्तिसम्पन्न इति कर्ता कथ्यते। मनोमयः कोश इच्छाशक्तिसम्पन्न इति विवेकसाधकत्वेन करणमुच्यते। प्राणमयकोशश्च गमनादिक्रियासम्पन्न इति कार्यमुच्यते। ज्ञानेन्द्रियसहितो बुद्धिरूपकर्ता मनोज्ञानेन्द्रियरूपकरण-साहाय्येन प्राणादिपञ्चकद्वारा कर्मेन्द्रियपञ्चकद्वारा च गमनादिकार्यं कारयतीति तत्त्वम्। तत्तत्कार्यक्षमतानुसारेणैवैते स्वकार्ययोग्यतानुसारं कर्तृ-करणकार्य-नामभाजः। मिलित्वैतत्त्रयं सूक्ष्मशरीमुच्यते॥ १३॥

सूक्ष्मशरीरों के सत्रह अवयव होते हैं। इन्हीं को लिंग-शरीर भी कहते हैं (लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भावः एभिरिति लिङ्गानि; लिङ्गानि च तानि शरीराणि इति लिङ्गशरीराणि) 'सप्तदशः प्रजापतिः' (श० ब्रा०) तथा 'मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम्' (संक्षिप्त शा० भा०) में भी सूक्ष्मशरीर के सत्रह अवयव बतलाये गये हैं, वे सत्रह अवयव निम्नलिखित हैं:—

पञ्चप्राणमनोबुद्धि दशेन्द्रियसमन्वितम्।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्॥'

अर्थात् श्रोत्र, त्वक्, चक्षु, जिह्वा, घ्राण ये पाँच ज्ञानेन्द्रियाँ; वाणी, पैर, हाथ, पायु (मलत्यागेन्द्रिय), उपस्थ (मूत्रेन्द्रिय) ये पाँच कर्मेन्द्रियाँ तथा पञ्च प्राण, बुद्धि एवं मन ये सब आकाशादिकों के सात्त्विक अंशों से क्रमशः अलग-अलग पैदा होते हैं—आकाश के सात्त्विक अंश से श्रोत्र, वायु के

सात्त्विक अंश से त्वक्, तेज के सात्त्विक अंश से चक्षु, जल के सात्त्विक अंश से जिह्वा और पृथ्वी के सात्त्विक अंश से घ्राण की उत्पत्ति होती है।

'मैं ब्रह्म हूँ' अथवा 'यह बात बिलकुल ऐसी है' इस प्रकार निश्चय करने वाली अन्तःकरण की वृत्ति को बुद्धि कहते हैं। 'यह बात ऐसी है अथवा नहीं' (मैं चेतनस्वरूप हूँ या देह हूँ) इस प्रकार संशय करने वाली अन्तःकरण की वृत्ति का नाम मन है। स्मरणात्मक चित्त का अन्तर्भाव बुद्धि में और गर्वात्मक अहङ्कार का अन्तर्भाव मन में ही हो जाने के कारण इनके अलग लक्षण नहीं दिये गये। मन, बुद्धि, चित्त और अहंकार इन चारों का नाम अन्तःकरण है। यद्यपि वह एक है तथापि एक ही व्यक्ति के जैसे अलग-अलग काम करने पर अलग-अलग नाम हो जाते हैं, उसी प्रकार इन चारों के अलग-अलग काम होने के कारण एक ही अन्तःकरण के भिन्न चार नाम हैं; अर्थात् जैसे 'राम' यदि पढ़ाने लगे तो पाठक, यदि रसोई बनाने लगे तो पाचक और यदि माँगने लगे तो उसी का नाम याचक हो जाता है, उसी प्रकार एक ही अन्तःकरण संशयात्मक दशा में मन, निश्चयात्मक दशा में बुद्धि, स्मरणात्मक दशा में चित्त एवं गर्वात्मक दशा में अहंकार के नाम से व्यवहृत होता है। वास्तव में ये चारों भिन्न वृत्तियों के अनुसार एक ही (अन्तःकरण) के नामान्तर हैं। ये सब आकाशादिगत सात्त्विक अंशों से उत्पन्न हैं— इनमें आकाशादि सभी के सात्त्विक अंश मिले रहते हैं। मन, बुद्धि, चित्त, अहंकार ये चारों प्रकाशात्मक हैं, यही इस बात का प्रमाण है कि इनकी उत्पत्ति महाभूतों के सात्त्विक अंशों से होती है।

ज्ञानेन्द्रियों के समेत बुद्धि को विज्ञानमयकोश कहते हैं। इसी विज्ञानमय-कोश से युक्त चैतन्य अपने आप को कर्त्ता, भोक्ता, सुखी एवं दुःखी समझता है। इसी कारण इसको स्वर्गादिलोक प्राप्त होते हैं। व्यावहारिक दशा में इसी विज्ञानमय कोशयुक्त चैतन्य को जीव कहते हैं।

सत्त्व गुणांशों से उत्पन्न होने के कारण सत्त्वगुणप्रधान मन, चक्षु, श्रोत्र इत्यादि ज्ञानेन्द्रियों के सहित मनोमयकोश कहलाता है। इसका नाम इस कारण है कि मन सत्त्वगुणांशों से उत्पन्न होता है, किन्तु रजोविकार जो इच्छा तद्रूपी होने के कारण सङ्कल्पविकल्पात्मक है, अतः बुद्धि की अपेक्षा अधिक जड़ है, क्योंकि बुद्धि निश्चयात्मकान्तःकरण वृत्ति का नाम है, उसमें संकल्प-विकल्प नहीं। कोश इस कारण कहलाता है कि आत्मा का आच्छादक

है जिह्वा, हाथ, पैर तथा मल-मूत्रस्थान ये कर्मेन्द्रियाँ हैं। ये सब आकाशादिकों के रजोगुणांशों से क्रमशः पृथक्-पृथक् उत्पन्न होती हैं, अर्थात् यद्यपि आकाशादि में तीनों गुण (सत्, रज, तम) वर्तमान हैं तथापि वागादिकों में आकाशादि के रजोंऽश का आधिक्य है, क्योंकि रजोगुणप्रधान आकाशादि से वागिन्द्रिय; रजोगुणप्रधान वायु से पाणीन्द्रिय एवं रजोगुणप्रधान अग्नि से पादेन्द्रिय तथा रजोगुण-प्रधान जल से मलविसर्जन की इन्द्रिय और रजोगुण-प्रधान पृथ्वी से मूत्रेन्द्रिय की उत्पत्ति होती है।

प्राण, अपान, व्यान, उदान और समान ये पाँच वायु हैं। साङ्ख्य के मत से नाग, कूर्म, कृकल, देवदत्त तथा धनञ्जय ये भी अन्य पाँच वायु हैं जिनमें से—

'उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः।
कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे।
न जहाति मृतं वापि सर्वव्यापी धनञ्जयः॥'

किन्तु वेदान्ती लोग इन सबका प्राण इत्यादिकों में ही अन्तर्भाव मानते हैं। इन पाँचों प्राणादिकों की उत्पत्ति रजोगुण-प्रधान आकाशादिकों के मिलितांशों से होती है। कर्मेन्द्रियों के सहित इन्हीं पाँचों प्राणादिकों को प्राणमय कोश कहते हैं। यह क्रियात्मक है, अतः इसकी उत्पत्ति का हेतु रजोगुणांश माना गया है (यह कार्य है, रजोगुणांश कारण है)। पूर्वोक्त इन तीनों कोशों (विज्ञानमय, मनोमय, प्राणमय) में से विज्ञानमयकोश ज्ञानशक्ति से युक्त है, अतः कर्त्ता कहलाता है। मनोमयकोश इच्छा-शक्तिसम्पन्न है, अतः विवेक का साधन (कारण) कहलाता है तथा प्राणमयकोश गमनादि-क्रिया सम्पन्न है, अतः कार्यस्वरूप है। अर्थात् ज्ञानेन्द्रियों के समेत बुद्धिरूपकर्त्ता मन एवं ज्ञानेन्द्रिय कारण की सहायता से प्राणादि पञ्चक तथा कर्मेन्द्रियों से गमनादि कार्य करवाता है। इन तीनों में अलग-अलग इन तीनों बातों की योग्यता है, अतः अपनी-अपनी योग्यता के अनुसार ही इनका कर्त्ता, करण तथा कार्य इन नामों से विभाग किया गया है। ये तीनों मिलकर सूक्ष्मशरीर कहलाते हैं॥१३॥

सूक्ष्मप्रपञ्चनिरूपणम्

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिरनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति। एतत्समष्ट्युपहितं चैतन्यं

सूत्रात्मा, हिरण्यगर्भः प्राणश्चेत्युच्यते सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च। अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं, जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते। एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नोऽत एव स्थूलशरीरलयस्थानमिति चोच्यते। एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः 'प्रविविक्तभुक्तैजस' इत्यादिश्रुतेः। अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्चाभेदः। एव सूक्ष्मशरीरोत्पत्तिः ॥ १४ ॥

अत्रापि अखिलचराचराचरानन्तसूक्ष्मशरीराणामेकत्वविवक्षायामेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः। पार्थक्येन चानेकजीवानां प्रत्येकं स्वस्वसूक्ष्मशरीरस्य स्वस्वबुद्धिविषयतया वृक्षवज्जलादिवद्वा व्यष्टिः। एतत्सूक्ष्मशरीरसमष्ट्युपहितं चैतन्यं स्रक्सूत्रमिव सर्वत्रानुस्यूतत्वात्पूर्वोक्तज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च सूत्रात्मा, हिरण्यगर्भः प्राणश्चोच्यते। अस्य सूत्रात्मकहिरण्यगर्भस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरम्, विज्ञानमयादिकोशत्रयं तथा विराड्रूपेणानुभूतस्थूलप्रपञ्चविषयकवासनामयत्वात्स्वप्नः, अत एव (सूक्ष्मत्वात्स्वप्नत्वाच्च) स्थूलप्रपञ्चलयस्थानमित्युच्यते।

एतत्सूक्ष्मशरीरव्यष्ट्युपहितं चैतन्यं तेजोमयान्तःकरणोपहितत्वात् तैजस उच्यते अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरम्, विज्ञानमयादिकोशत्रयं तथा विश्वचैतन्येनानुभूतस्थूलशरीरविषयकवासनामयत्वात्स्वप्नः, अत एव (सूक्ष्मत्वात्स्वप्नत्वाच्च) स्थूलप्रपञ्चलयस्थानञ्चोच्यते।

तदानीमर्थात् स्वप्नकाले एतौ सूत्रात्मतैजसौ सूक्ष्माभिर्मनोवृत्तिभिर्वासनामयान् सूक्ष्मशब्दादिविषयान् सुषुप्तिकाले सूक्ष्माभिरज्ञानवृत्तिभिरीश्वरप्राज्ञावानन्दमिवानुभवतः। तथा च श्रुतिः—'स्वप्नस्थानोऽन्तःप्रज्ञः……' इत्यादि (स्वप्नावस्थायां बाह्यविषयासम्बद्धस्य, अग्निसूर्यचन्द्रवायुवेददिगाकाशपृथ्व्येतरसप्ताङ्गस्य, ज्ञानकर्मेन्द्रियप्राणपञ्चकमनोबुद्धिचित्ताहङ्कारैतदेकोनविंशतिमुखस्य प्रविविक्तभुजो वासनामयसूक्ष्मशब्दादिविषयाणामुपभोक्तुश्चैतन्यस्य तैजससंज्ञेति भावः)।

अत्रापि विज्ञानमयादिकोशत्रयसमष्टिव्यष्टयोस्तदुपहितसूत्रात्मतैजसचैतन्ययोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्चैवं जलजलाशयप्रतिबिम्बिताकाशवच्चैवयम् । एवमपञ्चीकृतपञ्चमहाभूतेभ्यः सूक्ष्मशरीरोत्पत्तिः ॥ १४ ॥

यहाँ पर भी सम्पूर्ण चराचर अनन्त सूक्ष्मशरीरों को जब शरीररूपेण एक मानते हैं तो वे सब एकत्व-विवक्षा में एकबुद्धिविषयक होने के कारण वन अथवा जलाशय के समान समष्टि पद से व्यवहृत होते हैं और वे ही जब अलग-अलग अनेक माने जाते हैं तो अनेक जीवों के स्वस्वबुद्धि-विषयक होने के कारण वृक्ष अथवा जल के समान व्यष्टि पद में व्यवहृत होते हैं। इन सूक्ष्मशरीरों की समष्टि में जो चैतन्यात्मा वर्तमान है, उसको सूत्रात्मा, हिरण्यगर्भ या प्राण कहते हैं। वह इन सबमें—माला में सूत्र की तरह—वर्तमान है तथा विज्ञानमय, मनोमय और प्राणमय इन तीनों कोशों से युक्त होने के कारण ज्ञान, इच्छा तथा क्रिया से सम्पन्न है। इस सूत्रात्मक हिरण्यगर्भ की यह समष्टि स्थूल प्रपञ्च की अपेक्षा सूक्ष्म है, अतः सूक्ष्मशरीर एवं विज्ञानमयादि कोशत्रय तथा विराट् रूप में अनुभूत स्थूलप्रपञ्चविषयक वासनामय होने के कारण स्वप्न इसी कारण स्थूलप्रपञ्च के लय का स्थान कहलाती है।

व्यष्टि रूप से अर्थात् पृथक्-पृथक् सूक्ष्मशरीरों से उपलक्षित चैतन्य की तैजस् संज्ञा है, क्योंकि वह तेजोमय अन्तःकरण से विशिष्ट है। इसकी भी यह व्यष्टि स्थूलशरीर की अपेक्षा सूक्ष्म होने के कारण सूक्ष्मशरीर विज्ञानमयादि कोशत्रय तथा विश्वचैतन्य से अनुभूत स्थूलशरीर-विषयक वासनामय होने के कारण स्वप्न इसी कारण स्थूलशरीर के लय का स्थान कहलाती है। ये दोनों सूत्रात्मा और तैजस स्वप्नावस्था में सूक्ष्म मनोवृत्तियों द्वारा वासनामय शब्दादि विषयों का उसी प्रकार अनुभव करते हैं, जिस प्रकार ईश्वर और प्राज्ञ अज्ञान वृत्तियों के द्वारा सुषुप्ति अवस्था में आनन्द का अनुभव करते हैं। इस विषय में श्रुति भी प्रमाण है :—स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्गः, एकोनविंशतिमुखः प्रविविक्तभुक् (सूक्ष्मजगतो भोक्ता) तैजसः' (मा० ३) अर्थात् स्वप्नावस्था में बाह्यविषयों से असम्बद्ध अग्नि, (सिर) सूर्य-चन्द्र, (नेत्र) वायु, (प्राण) वेद, (जिह्वा) दिशा, (श्रोत्र) आकाश, (नाभि) तथा पृथिवी (पैर) इन सात अङ्गों तथा पञ्चज्ञानेन्द्रिय, पञ्चकर्मेन्द्रिय, पञ्चप्राण एवं मन, बुद्धि, चित्त, अहङ्कार इन उन्नीस मुखों से वासनामय सूक्ष्म शब्दादि विषयों के उपभोक्ता चैतन्य की तैजस संज्ञा है।

यहाँ पर भी विज्ञानमयादि कोशत्रयसमष्टिरूप को तथा तदवच्छिन्न सूत्रात्म चैतन्य की एवं व्यष्टिरूप विज्ञानमयादिकोशत्रय को तथा तदवच्छिन्न तैजस चैतन्य को वन और वृक्ष के समान तथा वनावच्छिन्न एवं वृक्षावच्छिन्न आकाश के समान एवं जल व जलाशय के समान और उसमें प्रतिबिम्बित आकाश के समान अभिन्नता है, अर्थात् ये दोनों समष्टि और व्यष्टि तथा तदवच्छिन्न दोनों चैतन्य परस्पर उसी प्रकार एक हैं, जैसे वनावच्छिन्नाकाश अथवा जलप्रतिबिम्बिताकाश एवं जलाशयप्रतिबिम्बिताकाश। तात्पर्य यह कि इनमें केवल समष्टि और व्यष्टि तथा सूत्रात्मा और तैजस यह नाममात्र का भेद है, वस्तुगत्या समष्टि तथा व्यष्टि एवं तद्गत दोनों चैतन्य परस्पर एक हैं। इस प्रकार अपञ्चीकृत पञ्चमहाभूतों से सूक्ष्मशरीर की उत्पत्ति होती है ॥ १४ ॥

पञ्चीकरणप्रकारः

स्थूलभूतानि तु पञ्चीकृतानि। पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्द्धभागपरित्यागेन भागान्तरेषु संयोजनम्। तदुक्तम्—

> 'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः
> स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ॥' इति ॥

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात्। पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च 'वैशेष्यात्तद्वादस्तद्वादः' इति न्यायेनाकाशादिव्यपदेशः सम्भवति, तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शावग्नौ शब्दस्पर्शरूपाण्यप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च।

सूक्ष्मप्रपञ्चोत्पत्तिरपञ्चीकृतमहाभूतेभ्यः, स्थूलप्रपञ्चोत्पत्ति पञ्चीकृतमहाभूतेभ्य इत्युक्तपूर्वत्वात्सूक्ष्मप्रपञ्चोत्पत्तिनिरूपणान्तरं स्थूलप्रपञ्चोत्पत्तिनिरूपणे पञ्चीकरणप्रकारज्ञानस्यापेक्षितत्वेनेह तत्प्रकारो निरूप्यते—

पञ्चीकरणप्रकारः—आकाशादिपञ्चमहाभूतेषु एकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् चतुर्धा समं विभज्य प्रत्येकमहाभूतस्य पञ्च पञ्च भागाः कृताः (एकोऽर्धभागः, चत्वारश्चाष्टमांशभागाः) ततश्चत्वारोऽष्टमांशभागाः स्वस्वद्वितीयार्धभागपरित्यागेनान्यमहाभूतचतुरर्धभागेषु एकैकं संयोजिताः। एवं प्रत्येकमहाभूतस्य चतुरन्यमहाभूताष्टमांश-

विशिष्टस्वकीयार्धांशतया पञ्चमहाभूतविशिष्टं सञ्जायते। अयमेव प्रकारः 'द्विधा विधाय चैकैकम्'—इत्यादिना पञ्चदश्यां तथा 'पृथिव्यादीनि भूतानी'त्यादिना सुरेश्वरवार्तिके चाप्युक्तः।

ननु छान्दोग्योपनिषदि तेजोऽबन्नानामुत्तरोत्तरक्रमेणोत्पत्तिमुक्त्वा तद् त्रिवृत्करणात् (प्रत्येकार्धभागविशिष्टेतरतुरीयांशभागात्) सृष्टिरुक्ता अत्र च पञ्चीकरणात् सा प्रतिपाद्यते इत्युभयोर्विरोध इति चेन्न, त्रिवृत्करणश्रुतेः पञ्चीकरणश्रुतेरप्युपलक्षणत्वात् (स्वबोधकत्वे सति स्वेतरबोधत्वात्) सृष्टिपरिपूर्त्यर्थं भूतपञ्चकस्यापेक्षितत्वाच्छान्दोग्योक्तत्रिवृत्करणस्यावशिष्टाकाशवायुभूतद्वयविशिष्टपञ्चकाभिप्रायेणोक्तत्वादिति भावः।

नन्वेवं पञ्चानामपि महाभूतानां पञ्चात्मकत्वे वायोः पार्थिवांशविशिष्टतया चाक्षुषप्रत्यक्षम्, आकाशस्य च जलीयांशविशिष्टतया त्वाचचाक्षुषप्रत्यक्षपूर्वकं गन्धोपलब्धित्वं स्यादिति चेन्न, पञ्चानां पञ्चात्मकत्वे समानेऽपि स्वस्वार्धभागाधिक्येन वर्तमानादाकाशादिव्यपदेशोपपत्तौ वायोश्चाक्षुष प्रत्यक्षस्याकाशे च त्वाचप्रत्यक्षातिरिक्तगन्धोपलब्धेश्चाभावात्। अत एव पञ्चीकृताकाशे शब्दः, पञ्चीकृतवायौ च शब्दस्पर्शौ, अग्नौ च शब्दस्पर्शरूपाणि, जले च शब्दस्पर्शरूपरसाः, पृथिव्याञ्च शब्दस्पर्शरूपरसगन्धाः, उत्तरोत्तरं स्वस्वकारणानुरूपं स्पष्टतया प्रतीयन्ते॥ १५॥

[सूक्ष्म प्रपञ्च की उत्पत्ति अपञ्चीकृत महाभूतों से तथा स्थूल प्रपञ्च की उत्पत्ति पञ्चीकृत महाभूतों से होती है, यह पहले कहा जा चुका है। अतः सूक्ष्म प्रपञ्चोत्पत्ति के पश्चात् स्थूल प्रपञ्चोत्पत्ति के वर्णन में पञ्चीकरण प्रकार का ज्ञान अपेक्षित होने के कारण पहले उसको बतलाते हैं]—

पञ्चीकरणप्रकार—आकाशादि पञ्चमहाभूतों के दो-दो भाग किये। फिर उन दशों भागों में से प्राथमिक पाँचों भागों के पुनः चार-चार भाग किये। इस प्रकार सबके पाँच-पाँच भाग हो गये (एक अर्द्धांश तथा चार अष्टमांश)। अब उन सब भागों में से अपने-अपने एक-एक अर्द्धांशभाग को छोड़कर एक-एक भाग (अष्टमांश) दूसरे-दूसरे चारों में मिला दिया। इस प्रकार प्रत्येक महाभूत में आधा अंश अपना और अष्टमांश दूसरे-दूसरे महाभूतों का मिल जाने से प्रत्येक आकाशादि पाँच-पाँच महाभूतों से संयुक्त हो जाते हैं। निम्नलिखित उदाहरण से यह बात और अधिक स्पष्ट हो जायगी—

कल्पना किया कि पाँच व्यक्तियों के पास एक-एक रुपया है। प्रत्येक ने अपने-अपने रुपये की दो-दो अठन्नियाँ कर लीं और एक-एक अठन्नी अपने पास रखकर दूसरी अठन्नी की चार दुअन्नियाँ बना लीं तथा उन चारों दुअन्नियों को शेष चारों व्यक्तियों को दे दिया। यही काम पाँचों ने किया—अपनी-अपनी अठन्नी पास रखकर दुअन्नियों को चारों में बाँट दिया। इस प्रकार प्रत्येक के पास आठ-आठ आने और आ जाने के कारण सबके पास एक-एक पूरा-पूरा रुपया हो गया। इसी प्रकार आकाशादि पञ्चमहाभूतों का अपना-अपना अर्द्धांश तथा शेष चार भूतों का अष्टमांश मिलाकर पञ्चीकृत महाभूत बने हैं। यही बात पञ्चदशी की निम्नलिखित कारिका में इस प्रकार कही गई है—

'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ॥'

सुरेश्वर वार्तिक में यही बात इस प्रकार कही गई है :—

'पृथिव्यादीनि भूतानि प्रत्येकं विभजेद् द्विधा।
एकैकं भागमादाय चतुर्धा विभजेत्पुनः॥
एकैकं भागमेकस्मिन् भूते संवेशयेत्क्रमात्।
ततश्चाकाशभूतस्य भागाः पञ्च भवन्ति हि॥
वाय्वादिभागाश्चत्वारो वाय्वादिष्वेवमादिशेत्।
पञ्चीकरणमेतत्स्यादित्याहुस्तत्त्ववेदिनः ॥

यहाँ यह सन्देह होता है कि छान्दोग्य उपनिषद् में पहले अग्नि, अग्नि से जल और जल से पृथिवी की उत्पत्ति बतला कर इनके त्रिवृत्करण (प्रत्येक के आधे तथा शेष दो के चतुर्थांश-चतुर्थांश) द्वारा ही सृष्टि की उत्पत्ति बतलाई गई है—सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि'। [छा० ६।३।२]

'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि इति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत्'। [छा० ६।३।६]

किन्तु यहाँ पर पञ्चीकरण के द्वारा सृष्टि की उत्पत्ति बतलायी जा रही है। इस शङ्का के समाधानार्थ कहते हैं कि उपनिषद् का त्रिवृत्करण इस पञ्चीकरण का उपलक्षण है, अर्थात् अपना भी बोध कराता है और इस पंचीकरण का भी द्योतक है, क्योंकि सृष्टि की परिपूर्ति के लिए पञ्चमहाभूत

अपेक्षित हैं, अतः छान्दोग्य में अग्नि, जल और पृथिवी का त्रिवृत्करण शेष दो महाभूत—आकाश और वायु से संयुक्त पञ्चमहाभूतों के पञ्चीकरण का उपलक्षण है।

अब यह सन्देह होता है कि यदि पाँचों महाभूतों में पाँचों के भाग मिले है तो वायु में पृथिवी का अंश होने के कारण उसका चाक्षुष प्रत्यक्ष होना चाहिये। इस प्रकार आकाश में भी जलीय एवं पार्थिव अंश होने के कारण उसका त्वाचप्रत्यक्ष, चाक्षुष प्रत्यक्ष तथा गन्धोपलब्धि होने चाहिये, पर ऐसा नहीं होता। अतः इस सन्देह के निवारणार्थ कहते हैं कि यद्यपि इन पांचों में पाँचों के भाग मिले हुए हैं, फिर भी प्रत्येक महाभूत में अपना-अपना अंश ही अधिक है इस कारण आकाशादि व्यवहार होता है और अपने-अपने में उनकी-उनकी अधिकता होने के कारण अपने-अपने गुणों के अनुकूल ही उनका उन-उन इन्द्रियों में प्रत्यक्ष होता है। यही कारण है कि पञ्चीकृत आकाश में शब्द; वायु में शब्द और स्पर्श, अग्नि में शब्द, स्पर्श, रूप, जल में शब्द, स्पर्श, रूप, रस और पञ्चीकृत पृथिवी में शब्द, स्पर्श, रूप, रस, गन्ध उत्तरोत्तर अपने-अपने कारणों के अनुसार स्पष्ट प्रतीत होते हैं॥ १५॥

स्थूलप्रपञ्चोत्पत्तिः

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यः भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलरसातलमहातलपातालतलातलनामकानामधोऽधोविद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्य स्थूलशरीराणां तदुचितानामन्नपानादीनाञ्चोत्पत्तिर्भवति। चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि। [1]जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि। अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि। उद्भिजानि भूमिमुद्भिद्य जातानि तृणवृक्षादीनि। स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि॥ १६॥

पूर्वोक्तप्रकारेण भूतारोपं (पञ्चमहाभूतपृथिव्याद्यारोपम्) प्रपञ्च्येह भौतिकारोपम् (भूर्भुवःस्वराद्यारोपम्) आह—एतेभ्य इति। एतावता ग्रन्थेन पृथिव्यादिपञ्चमहाभूतोत्पत्तिमुक्त्वाऽधुना तेभ्यश्चतुर्दशभुवनादीनामुत्पत्तिप्रकारो वर्ण्यते इति भावः॥ स्पष्टोऽर्थः॥ १६॥

१. गर्भाशयो जरायुः स्यात्।

इन पञ्चीकृत महाभूतों से भूर्भुवः स्वः इत्यादि नामक ऊपर के लोक तथा अतल, वितल इत्यादि नीचे के लोक इस प्रकार चतुर्दश भुवन ब्रह्माण्ड एवं उसमें वर्तमान मनुष्य—पशु आदि जरायुज, पक्षी, सर्प इत्यादि अण्डज, भूमि को फोड़कर उत्पन्न होने वाले तृण-वृक्षादि उद्भिज्ज तथा पसीने-मैल से उत्पन्न होनेवाले जुएँ-मच्छर स्वेदज आदि इन चतुर्विध स्थूलशरीर तथा उनके पोषणार्थ अन्न-पानादि की उत्पत्ति होती है ॥ १६ ॥

स्थूलप्रपञ्चनिरूपणम्

अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा व्यष्टिरपि भवति। एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च। अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते। एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते। तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादिन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात्सङ्कल्पनिश्चयाहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतो 'जागरितस्थानो बहिःप्रज्ञः' इत्यादिश्रुतेः अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः ॥ १७ ॥

अत्राप्येतच्चतुर्विधस्थूलशरीरस्यैकस्थानैकत्वविवक्षायामेकानेकबुद्धिविषयत्वं वनवज्जलाशयवद्वा समष्टिश्च। एतत्समष्ट्युपहितं चैतन्यं सर्वप्राणिसमूहे 'अहम्' इत्यभिमानेन वर्ततेऽतो वैश्वानरः विविधं राजते (नानाप्रकारेण शोभते) अतः विराट् इति च कथ्यते। अज्ञानस्यैषा समस्तब्रह्माण्डान्तर्गतचतुर्विधस्थूलशरीरसमष्टिः स्थूलशरीरम्, मातापितृभुक्तान्नोत्पन्नत्वेनात्मान्छादकत्वेन चान्नमयः कोशः सुखदुःखादिभोगाधारत्वेन च स्थूलशरीरम् तत्तदिन्द्रियैस्तत्तद्विषयोपलब्धेश्च जाग्रदुच्यते।

पूर्वोक्तैतच्चतुर्विधस्थूलशरीरव्यष्ट्युपहितं चैतन्यं सूक्ष्मशरीराभिमानमजहत् प्रत्येकस्थूलशरीरे 'अहम्' इत्येवमभिमत्य वर्तमानमिति विश्वः कथ्यते। एतदज्ञानस्यापीयं व्यष्टिः स्थूलशरीरम्, अन्नविकारत्वादात्माच्छादकत्वाच्चान्नमयकोशः, इन्द्रियैर्विषयादानाज्जाग्रदिति चोच्यते।

एतस्यां जाग्रदवस्थायामेतौ वैश्वानरविश्वौ दिग्वायुसूर्यवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेन्द्रियपञ्चकेन क्रमशः शब्दस्पर्शरूपरसगन्धान् तथा अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वाक्पाणिपादपायूपस्थेन्द्रियपञ्चकेन क्रमशः वचनादानगमनमलत्यागानन्दान् एवमिन्द्रब्रह्मशंकरविष्णुभिः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमशः सङ्कल्पनिश्चयाहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतः। यथा च माण्डूक्योपनिषदि 'जागरितस्थानो बहिःप्रज्ञ ....' इत्यादि अत्राप्युभयप्रकारसमष्टिव्यष्ट्योस्तदुपहितचैतन्यवैश्वानरविश्वयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्चजलाशयजलवत्तत्प्रतिबिम्बिताकाशवच्च परस्परं पूर्ववदभेदः। एवं रीत्या पञ्चीकृतपञ्चमहाभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिर्जायते॥ १८॥

इनमें भी ये चारों प्रकार के स्थूलशरीर, एकत्व या अनेकत्व की विवक्षा में प्रत्येक व्यक्ति की एक बुद्धि तथा पृथक्-पृथक् व्यक्तियों की अलग-अलग अनेक बुद्धियों के विषय होने के कारण वन तथा जलाशय के समान समष्टि एवं वृक्ष तथा जल के समान व्यष्टि के नाम से व्यवहृत होते हैं, अर्थात् एकत्व विवक्षा में जैसे वृक्ष वन तथा सब जल जलाशय कहलाते हैं, उसी प्रकार स्थूलशरीर एकत्व विवक्षा में एक बुद्धि का विषय तथा अनेकत्व विवक्षा में भिन्न-भिन्न शरीर विभिन्न बुद्धियों के विषय माने जाते हैं। इस समष्टि से उपहित चैतन्य को वैश्वानर, विराट् कहते हैं, क्योंकि समस्त प्राणियों में 'मैं' इस अभिमान द्वारा विविध प्रकार से शोभायमान है। अज्ञान (माया, अविद्या) की इस समस्त ब्रह्माण्डान्तर्गत चार प्रकार के स्थूलशरीरों की समष्टि को स्थूलशरीर कहते हैं। यह माता-पिता के खाये हुए अन्न से उत्पन्न होता है, अतः अन्नमय, आत्मा का आच्छादक होने के कारण कोश, सुखदुःखादि के भोग का आधार होने के कारण स्थूलशरीर तथा इन्द्रियों के द्वारा विषयों को भोगने के कारण जाग्रत कहलाता है पूर्वोक्त इन चार प्रकार के स्थूलशरीरों की व्यष्टि से उपहित चैतन्य को विश्व कहते हैं, क्योंकि वह सूक्ष्मशरीर का अभिमान रखता हुआ भी प्रत्येक स्थूल शरीरादि में 'मैं' इस अभिमान रूप से

वर्तमान है। इस अज्ञान (अविद्या) की भी यह व्यष्टि स्थूलशरीर, अन्न का विकार होने के कारण अन्नमय कोश तथा जाग्रत कहलाती है।

इस जाग्रत अवस्था में ये विश्व और वैश्वानर दिक्, वायु, सूर्य, वरुण तथा अश्विनीकुमार इन देवताओं से क्रमशः नियन्त्रित श्रोत्र, त्वक्, चक्षु, जिह्वा तथा घ्राण—इन पाँच इन्द्रियों से क्रमशः शब्द, रूप, रस, गन्ध इनका तथा अग्नि, इन्द्र, उपेन्द्र, यम और प्रजापति इनके द्वारा क्रमशः नियन्त्रित वाक्, पाणि, पाद तथा मल-मूत्रेन्द्रिय रूप पांच इन्द्रियों से क्रमशः बोलना, लेना, चलना, मलत्याग तथा आनन्द का, चन्द्र, ब्रह्मा, शङ्कर तथा विष्णु इनके द्वारा क्रमशः नियन्त्रित मन, बुद्धि, अहङ्कार तथा चित्तरूपी सम्पूर्ण स्थूल विषयों का अनुभव करते हैं। यही बात माण्डूक्य उपनिषद् की 'जागरितस्थानो (जागरितं स्थानम् अवस्था यस्य) बहिःप्रज्ञः (बहिः स्वात्मव्यतिरिक्तविषयेषु प्रज्ञा बुद्धिर्यस्य) सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः' इस श्रुति में भी बतलाई गई है।

यहाँ पर भी दोनों स्थूल समष्टि व व्यष्टि में तथा तदुपहित चैतन्य विश्व, वैश्वानर में वन व वृक्ष तथा जल व जलाशय एवं जलगत आकाश की तरह परस्पर कोई भेद नहीं।

इस प्रकार पञ्चीकृतपञ्चमहाभूतों से स्थूल प्रपञ्च की उत्पत्ति होती है ॥ १७ ॥

महाप्रपञ्चनिरूपणम्

एतेषां स्थूल सूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान् प्रपञ्चो भवति यथावान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वाऽवान्तरजलाशयानां समष्टिरेको महान् जलाशयः। एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिम्बाकाशवच्चैकमेव। आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं तदनुपहितं चैतन्यं 'सर्वं खल्विदं ब्रह्म' इति वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति।

एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः ॥ १८ ॥

एतावता ग्रन्थेकारेणसूक्ष्मस्थूलप्रपञ्चं पार्थक्येन निरूप्येदानीं तेषामपि समष्टिव्यष्टिनिरूपणं क्रियते—एतेषामिति। पलाशखदिरादिवृक्षावान्तरवनानां

समष्टिरेकं महद्वनं भवति, यथा वा वापीकूपतडागाद्यवान्तरजलाशयानामेको महान् जलाशयो भवति तथैव रीत्या कारणसूक्ष्मस्थूल शरीराणां समष्ट्या एको महान् प्रपञ्चो भवति। तथा वनावच्छिन्नाकाशवृक्षावच्छिन्नाकाशप्रोजंजगत-जलाशयगतप्रतिविम्बाकाशयोश्च यथा न कोऽपि भेदस्तथैव तन्महाप्रपञ्च-समष्टिव्यष्टयोस्तदुपहितचैतन्येश्वरप्राज्ञयोः, हिरण्यगर्भतैजसयोः, वैश्वानरविश्व-योश्च न कोऽपि भेदः।

एतन्महाप्रपञ्चेन तथा तदुपहितचैतन्येन चाभिन्नं तदनुपहितचैतन्यं (शुद्ध-चैतन्यम्) 'सर्वं खल्विदं ब्रह्म' इत्यस्य वाच्यार्थस्तथा भिन्नं सल्लक्ष्यार्थो भवति, अर्थात् यथा अग्निप्रक्षिप्तेन ज्वलदङ्गारतामापन्नेनायसा दग्धः 'अहमयसा दग्धः' इति व्याहरति वस्तुगत्या दाहकता तु वह्निनिबन्धनैव नायोनिबन्धना प्रत्युताग्निसम्पर्केणैवाग्न्ययसोस्तादात्म्याध्यासस्तथैव महाप्रपञ्चेन तदवच्छिन्न-चैतन्येन चान्योन्यतादात्म्याध्यासापन्नं यदनुपहितं चैतन्यं तदेव 'सर्वं खल्विदं ब्रह्म' इत्यस्य वाच्यार्थतां तथा पूर्वोक्तप्रपञ्चेन विविक्तं सत्तस्य लक्ष्यार्थताञ्च भजते। अयमाशयः—सर्वम् अर्थात् महाप्रपञ्चः, तदुपहितं चैतन्यम् तदनुपहितं चैतन्यञ्च कथमेकं स्यादिति विचिकित्सायां मुख्यार्थस्य बाध इति लक्षणया सर्वं खल्विदं रूपविशेषणांशं परित्यज्य चैतन्यांशमात्रग्रहणेन महाप्रपञ्चोपहित-चैतन्यतदनुपहितचैतन्ययोश्चैकत्वं निर्विवादं स्यात्। यथाऽयो दहतीत्यस्य लक्षणयाऽयोगताग्निर्दहतीत्यर्थस्तथैव सर्वस्यैतत्प्रपञ्चस्य ब्रह्मात्वाभावे 'सर्वं खल्विदं ब्रह्म' इति वाक्येऽपि सर्वं खल्विदमित्यस्य चैतन्यांशे लक्षणया सर्वप्रपञ्चतद्गतचैतन्ययोश्चैकत्वं सिद्ध्यति।

एतावता ग्रन्थेनेश्वरचैतन्ये सामान्यरूपेणास्य महाप्रपञ्चस्यारोपप्रकारः प्रदर्शितः ॥ १८ ॥

जिस प्रकार पलाश, खदिर आदि के अलग-अलग वनों की समष्टि से एक महावन बन जाता है तथा वापी-कूप-तडागादि भिन्न-भिन्न जलाशयों से एक महाजलाशय बन जाता है, उसी प्रकार कारण, सूक्ष्म और स्थूल शरीरों की समष्टि से एक महाप्रपञ्च बन जाता है तथा जिस प्रकार वनावच्छिन्न या वृक्षावच्छिन्न एवं जलगत तथा जलाशयगत प्रतिविम्बाकाश में कोई भेद नहीं, उसी प्रकार उस महाप्रपञ्च की समष्टि व्यष्टि तथा तदुपहित चैतन्य ईश्वर, प्राज्ञ, हिरण्यगर्भ, तैजस, वैश्वानर, विश्व में कोई भेद नहीं।

इस महाप्रपञ्च तथा तदुपहित चैतन्य से अभिन्न होकर अनुपहित (शुद्ध) चैतन्य 'सर्वं खल्विदं ब्रह्म' का वाच्य अर्थ है तथा वही विविक्त (भिन्न) होने पर लक्ष्य अर्थ है, अर्थात् जैसे लोहे के गोले को आग में डाल देने से वह लाल हो जाता है और उससे जल जाने पर 'मैं लोहे से जल गया' यह कहा जाता है पर वास्तव में दाहकताशक्ति अग्नि में होती है, लोहे में नहीं और आग के सम्पर्क से लोहा तथा आग का अन्योन्य तादात्म्याध्यास होता है, उसी प्रकार महाप्रपञ्च तथा तदवच्छिन्न चैतन्य के साथ अन्योन्य तादात्म्याध्यासापन्न जो अनुपहित (शुद्ध) चैतन्य है, वही 'सर्वं खल्विदं ब्रह्म' का वाच्य अर्थ है और उक्त महाप्रपञ्च एवं तदवच्छिन्न चैतन्य के अन्योन्यतादात्म्याध्यास से जब शुद्धचैतन्य को अलग मानते हैं, तो वही 'सर्वं खल्विदं ब्रह्म' का लक्ष्य अर्थ हो जाता है। तात्पर्य यह कि जब ऐसा कहेंगे कि महाप्रपञ्च तथा तदुपहित चैतन्य एवं अनुपहित चैतन्य एक कैसे हो सकता है तो मुख्यार्थ बाध होने के कारण लक्षणा करनी पड़ेगी और उसके द्वारा 'सर्वं खल्विदं' रूप विशेषणांश को त्याग कर चैतन्यांशमात्र का ग्रहण किया जायगा, इसी प्रकार महाप्रपञ्चोपहित चैतन्य एवं अनुपहित चैतन्य एक हो जायेंगे। जिस प्रकार 'अयो दहति' में मुख्यार्थ का बाध है, क्योंकि लोहा जला नहीं सकता, अतः इस वाक्य में अयस् शब्द की अयोगत अग्नि में लक्षणा करके 'लोहे की अग्नि जलाती है' यह लक्ष्य अर्थ माना जाता है, उसी प्रकार 'सर्वं खल्विदं ब्रह्म' इस वाक्य में भी सर्वं खल्विदं की चैतन्यांश में लक्षणा के द्वारा सर्वप्रपञ्च तथा चैतन्य की एकता सिद्ध होगी।

इस प्रकार यहाँ तक वर्णन किया गया कि ईश्वर चैतन्य में सामान्य रूप से इस महाप्रपञ्च का किस प्रकार आरोप किया जाता है॥ १८॥

पुत्रादीनामात्मत्वसाधनम्

इदानीं 'प्रत्यगात्मनीमिदमयमारोपयतीति विशेषत उच्यते। अति प्राकृतस्तु 'आत्मा वै जायते पुत्रः' इत्यादिश्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति।

१. प्रत्यक्त्वं नाम सर्वान्तरत्वम्।

चार्वाकस्तु 'स वा एष पुरुषोऽन्नरसमय' इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति।

अपरश्चार्वाकः 'ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः' इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात् काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियात्मे'ति वदति।

अपरश्चार्वाकः 'अन्योऽन्यतरं आत्मा प्राणमय' इत्यादिश्रुतेः प्राणाभाव-इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावान् इत्याद्यनुभवाच्च प्राण आत्मेति वदति।

अन्यस्तु चार्वाकः 'अन्योऽन्यतर आत्मा मनोमय' इत्यादिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति।

बौद्धस्तु 'अन्योऽन्यतर आत्मा विज्ञानमय' इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति।

प्राभाकरतार्किकौ तु 'अन्योऽन्यतरं आत्माऽऽनन्दमय' इत्यादिश्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः।

भाट्टस्तु 'प्रज्ञानघन एवानन्दमय' इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति।

अपरो बौद्धः 'असदेवेदमग्र आसीत्' इत्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वभावपरामर्शविषयानुभवाच्च शून्यात्मेति वदति॥ १९॥

इदानीं प्रत्यक्चैतन्ये 'अयमात्मा, अयमात्मा' इति विशेषारोपप्रकारो निरूप्यते—

स्थूलबुद्धयो जनाः 'आत्मा वै जायते पुत्रः' इति श्रुतिप्रमाणेन पुत्रे स्वशरीरनिर्विशेषप्रेम्णा, पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टो वा जात इत्यनुभवेन च पुत्रमेवाहंपदवाच्यम् (प्रत्यक्चैतन्यम्) वदन्ति।

चार्वाकोऽभिधत्ते—यत्स्थूलशरीरमेवात्मा न पुत्रादि। यतो हि गृहेऽग्निना सन्दीप्ते सति पुत्रादिकं परित्यज्यापीदं शरीरं स्वसंरक्षणेच्छया तस्माद् बहिरागच्छतीति पुत्राद्यपेक्षया शरीरेऽस्मिन्मोहाधिक्यमुपलभ्यते। विषयेऽस्मिंस्ते 'स वा एष पुरुषोऽन्नरसमयः' इति श्रुतिम् 'अहं स्थूलः' 'अहं कृशः' इत्याद्यनुभवञ्च प्रमाणरूपेणोद्धरन्ति।

लोकायतचार्वाकाणां—मते इन्द्रियाण्येवात्मा । सुषुप्तावस्थायां निश्चेष्टावस्थायाञ्च विरते सर्वेन्द्रियव्यापारे शरीरं किमपि गमनादिव्यापारं कर्त्तुं न पारयति तथा 'काणोऽहं' बधिरोऽहम्', इत्याद्यनुभवोऽपि जायते । एतदतिरिक्त 'ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः' एषा श्रुतिरपि प्रमाणम्—प्रजापतिसमीपगमनम्, कथनञ्चैतत्सकलमचेतने न सम्भवति अतः इन्द्रियव्यापारेणैव शरीरस्य गमनादिकार्यसम्भवादिन्द्रियाण्येवात्मेति निश्चीयते ।

प्रणात्मवादी—चार्वाकः कथयति यन्न शरीरं नापि चेन्द्रियात्मा प्रत्युत तद्भिन्नाः प्राणा एवान्तरात्मा, तैर्विना शरीरस्येन्द्रियाणां वा व्यापाराभावात् । इत्येतदतिरिक्तोऽस्ति कश्चिद्यः साधनभूतैरेभिः शरीरेन्द्रियैः कर्म करोति । अत एव 'अन्योऽन्यतर आत्मा प्राणमयः' इति श्रुतिस्तथा 'बुभुक्षितोऽहं' 'पिपासितोऽहम्' इत्याद्यनुभवश्च संगच्छते ।

मन आत्मवादी—चार्वाकस्तु 'प्रत्येकज्ञाने प्राणादिभिः सह मनःसंयोगोऽत्यन्तावश्यक इति मनसि सुप्ते प्राणा वाण्यादयो वा न किञ्चिद्विधातुं शक्ताः, 'सङ्कल्पमहं करोमि' 'विकल्पमहं करोमि' इत्याद्यनुभवश्च जायते । अतः 'अन्योऽन्यतर आत्मा मनोमयः' इति श्रुतिमनुसृत्य मन एवात्मेति वदति ।

योगाचारमतावलम्बी—विज्ञानवादी बौद्धो बुद्धिमेवाभिधत्ते प्रत्यक् चैतन्यम् । मन इन्द्रियाणि च तदुपकरणभूतानि । कर्त्तुरभावे करणमात्रं न कार्यसम्पादनक्षमम्, तथा च 'अहं कर्त्ता' 'अहं भोक्ता' इत्याद्यनुभवोऽपि जायते । यतो ज्ञायते यत्कर्त्ता स्वकृतकर्मानुसारेण तत्फलस्य भोक्ता च शरीरेन्द्रियापेक्षयाऽन्य एव कश्चिदस्ति स च बुद्धिः । एतस्मिन् विषये सः 'अन्योऽन्यतर आत्मा विज्ञानमय' इति श्रुतिं तथा 'अहं कर्त्ता, अहं भोक्ता' इत्यनुभूतिञ्च प्रमाणत्वेनोपन्यस्यति ।

प्रभाकरमतावलम्बिमीमांसकास्तार्किकाश्चेत्थं वदन्ति–यद् बुद्धिसुखदुःखेच्छादीनामज्ञाने (ज्ञानभिन्ने, आत्मनि) लयः, अहमज्ञानीत्यनुभवश्च जायतेऽतोऽज्ञानमेवात्मा ।

कुमारिलभट्टमतानुयायिमीमांसकानां–मतेऽज्ञानोपहितचैतन्यमात्मा । यतो हि सुषुप्तौ मनस इन्द्रियाणां वा न भवति व्यापार इति तद्द्वारोत्पन्ने ज्ञाने 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिषम्' इति परामर्शोऽपि न सम्भवति किन्तु सुप्तोत्थितस्य स परामर्शो भवतीत्यन्यस्य कस्यचिदभावादज्ञानसंवलितचैतन्यमेवात्मा सिध्यति [परामर्शे चास्मिन् सुखमहमस्वाप्सम् इति बोधांशः

प्रकाशकोऽतः सुषुप्तिदशायां प्रकाशसद्भावः; तथा न किञ्चिदवेदिषम् इत्यत्र विज्ञानाभावस्वदर्शनादप्रकाशसद्भावः। इत्थं सुषुप्तौ प्रकाशाप्रकाशयोरुभयोः स्थितिः। किञ्च मामहं न जानामि इत्यनुभवोऽपि भवति; अत्र द्वावंशौ वर्तेते—एकः कर्त्रंशः, अपरश्च ज्ञानांशः। एतेन ज्ञानापेक्षया ज्ञाताऽन्य इति सिध्यतीति स एव ज्ञाता आत्मेति।]

माध्यमिकमतावलम्बिनो बौद्धास्तु 'असदेवेदमग्र आसीत्' अर्थात् एतन्नामरूपात्मकं जगत् सृष्टेः पूर्वं शून्यमासीत्' सुषुप्तौ न किञ्चित्तिष्ठति, सुषुप्त्यनन्तरमुत्थितस्य 'सुषुप्तौ नाहमासम्' इति निजाभावपरामर्शविषयकोऽनुभवोऽपि भवतीति सर्वाभावरूपशून्यमेवात्मा। स च न किमपि द्रव्यमिति वदन्ति ॥१९॥

[अब इसके आगे यह निरूपण करते हैं कि प्रत्यक् चैतन्य (अन्तरात्मा, जीवात्मा) में 'यह आत्मा है' 'यह आत्मा है' यह विशेष रूप से आरोप कैसे किया जाता है।]

मोटी बुद्धिवाले मनुष्य कहते हैं कि पुत्र ही आत्मा (अहंपदवाच्य) है। इस विषय में लोग 'आत्मा वै जायते पुत्रः' इस श्रुति को प्रमाण रूप में उद्धृत करते हैं और यह कहते हैं कि 'पुत्र के ऊपर अपने समान ही प्रेम होता है अर्थात् जितना प्रेम हम अपने शरीर से करते हैं उतना ही प्रेम पुत्र से भी करते हैं तथा उसके पुष्ट या नष्ट होने पर 'मैं पुष्ट या नष्ट हो गया' यह अनुभव करते हैं। अतः पुत्र ही आत्मा है।

चार्वाक का कहना है कि 'यह स्थूल शरीर ही आत्मा है पुत्रादि नहीं, क्योंकि घर में आग लग जाने पर पुत्रादि को छोड़ कर भी यह शरीर बाहर निकल आता है अतः पुत्रादि की अपेक्षा इस शरीर पर ही अधिक मोह देखा जाता है।' इस विषय में लोग 'स वा एष पुरुषोऽन्नरसमयः' इस श्रुति को तथा 'मैं मोटा हूँ' 'मैं पतला हूँ' इस अनुभव को प्रमाण रूप से उद्धृत करते हैं।

लोकायत चार्वाकों का मत है कि 'इन्द्रियाँ ही आत्मा हैं' क्योंकि सो जाने पर या निश्चेष्ट बैठ जाने पर जब इन्द्रियाँ कुछ काम नहीं करतीं, तब शरीर गमनादि कोई भी काम नहीं कर सकता तथा 'मैं काना हूँ' 'मैं बहरा हूँ' यह अनुभव भी होता है। इसके अतिरिक्त 'ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः' यह श्रुति भी प्रमाण है—प्रजापति के पास जाना और उनसे कहना (प्रवन करना) यह सब अचेतन नहीं कर करते, अतः इन्द्रियों के काम करने पर ही

शरीर का गमनादि कार्य करना देखकर यह निश्चित होता है कि इन्द्रियाँ ही आत्मा हैं।'

प्राणात्मवादी चार्वाक कहते हैं कि इन्द्रियाँ तथा शरीर ये कोई आत्मा नहीं प्रत्युत इनमें भिन्न ये प्राण ही अन्तरात्मा हैं। क्योंकि प्राणों के बिना यह शरीर अथवा इन्द्रियाँ कोई भी काम नहीं कर सकते। अतः निश्चित होता है कि इनके अतिरिक्त कोई है, जो कि इनके द्वारा काम करता है। इसलिए 'अन्योऽन्यतर आत्मा प्राणमयः' इस श्रुति के प्रमाण से तथा 'मैं भूखा हूँ', 'मैं प्यासा हूँ' इस अनुभव से प्राण ही आत्मा है, यह सिद्ध होता है।'

मन-आत्मवादी—चार्वाक कहता है कि 'हर प्रकार के ज्ञान में प्राणादिकों के साथ मन का संयोग अत्यन्त आवश्यक है। अतः मन के सो जाने पर प्राण या वाणी आदि कुछ नहीं कर सकते। इसके अतिरिक्त 'मैं सङ्कल्प करता हूँ, मैं विकल्प करता हूँ' इत्यादि अनुभव भी होता है अतः 'अन्योऽन्यतर आत्मा मनोमयः' इस श्रुति के अनुसार मन ही आत्मा है।'

योगाचार मतावलम्बी विज्ञानवादी बौद्ध कहते हैं कि 'बुद्धि आत्मा है, मन तथा इन्द्रियाँ करण हैं। यदि कर्त्ता न हो तो करणमात्र में कार्य सम्पादन की शक्ति नहीं रहती।' इसके अतिरिक्त 'मैं कर्ता हूँ', 'मैं भोक्ता हूँ' यह अनुभव भी होता है। इससे ज्ञात होता है कि काम करनेवाला तथा उसके अनुसार फल भोगने वाला शरीर और इन्द्रियों से अलग ही कोई है—वह बुद्धि है। इस विषय में वे लोग 'अन्योऽन्यतर आत्मा विज्ञानमयः' इति श्रुति को तथा 'अहं कर्त्ता', 'अहं भोक्ता' इत्यादि अनुभवों को प्रमाण रूप में उद्धृत करते हैं।

प्रभाकरमतानुयायी मीमांसक तथा तार्किक यह कहते हैं कि 'बुद्धि इत्यादि—ज्ञान-सुख-दुःखेच्छादि का अज्ञान (ज्ञान भिन्न आत्मा) में लय हो जाता है तथा 'मैं अज्ञानी हूँ' इत्यादि अनुभव भी होता है, इसलिए अज्ञान आत्मा है।'

कुमारिलभट्ट मतानुयायी मीमांसक कहते हैं कि अज्ञानोपहित चैतन्य आत्मा है। क्योंकि सषुप्ति दशा में मन तथा इन्द्रियों का व्यापार नहीं होता अतः उनके द्वारा उत्पन्न ज्ञान से 'सुखमहमस्वाप्सम् न किञ्चिदवेदिषम्' यह परामर्श नहीं हो सकता। किन्तु ऐसा परामर्श सोकर उठने के बाद होता है। इसलिए अन्य किसी के अभाव में अज्ञानसंवलित चैतन्य ही आत्मा सिद्ध होता है।

(इसमें 'सुखमहमस्वाप्सम्' यह बोधांश प्रकाशक है। अतः सुषुप्ति में प्रकाश-सद्भाव तथा 'न किञ्चिदवेदिषम्' में विज्ञानाभाव होने के कारण अप्रकाश-सद्भाव इस प्रकार सुषुप्तिदशा में प्रकाशाप्रकाशसद्भाव दोनों रहते हैं। इसके अतिरिक्त 'मामहं न जानामि' यह अनुभव भी होता है। इसमें दो अंश हैं, एक कर्त्रंश दूसरा ज्ञानांश। इससे सिद्ध है कि ज्ञान की अपेक्षा ज्ञाता अन्य है वही आत्मा है)।'

माध्यमिकतावलम्बी बौद्ध कहते हैं 'असदेवेदमग्र आसीत्' अर्थात् यह नामरूपात्मक जगत् सृष्टि के पूर्व शून्य था तथा सुषुप्ति में कुछ रहता ही नहीं; सुषुप्ति के पश्चात् उठने पर 'सुषुप्ति में मैं न था' ऐसा निजाभाव परामर्शविषयक अनुभव भी होता है। अतः सर्वाभावरूप शून्य ही आत्मा है— वह कोई द्रव्य नहीं ॥ १९ ॥'

पुत्रादीनामात्मत्वखण्डनम्

एतेषां पुत्रादीनामनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु, पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव, किञ्च, प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्त्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्य्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव। अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्तु इति वेदान्तविद्वदनुभवः। एवमध्यारोपः ॥ २० ॥

पुत्राद्यारम्भशून्यपर्यन्तमुक्तानामात्मत्वमिदानीं खण्डयते एतेषामिति— एतस्मात्पूर्वं पुत्रादीनामात्मत्वसिद्धये प्रमाणरूपेणोपन्यस्तानां श्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैस्स्वयमेव निरासो जात इति पुत्रादिशून्यपर्यन्तेऽनात्मत्वे सिद्धे 'कोऽहं प्रत्ययविषयक' 'आत्मे'ति सन्देहस्तादवस्थ्य एवेति तन्निरासायोद्ध्रियमाणाभिरन्यश्रुतिभिरेतत्प्रमाणीक्रियते यत्पुत्रादीनामात्मत्वसिद्धये याः श्रुतयः प्रमाणत्वेनोपन्यस्ताः सर्वाः वक्ष्यमाणश्रुतिभिर्बाध्यन्ते इति पुत्रादीनामात्मत्वं कथमपि न सिध्यति अपि तु 'अहं प्रत्ययविषयक आत्मा तद्व्यतिरिक्त एव'।

पूर्वोक्तपुत्रादीनामात्मत्वसाधकबाधकश्रुतयोऽधः प्रदर्श्यन्ते—

आत्मत्वसाधकश्रुतयः	आत्मत्वबाधकश्रुतयः
(१) आत्मा वै जायते: पुत्रः	(१) कश्चिद् धीरः प्रत्यागात्मानमैक्षत
(२) स वा एष पुरुषोऽन्नरसमयः 'स्थूलोऽहं कृशोऽहम्'	(२) अस्थूलमनण्वह्रस्वमदीर्घम्
(३) ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः 'काणोऽहं बधिरोऽहम्'	(३) अचक्षुःश्रोत्रं तदपाणिपादम्
(४) अन्योऽन्यतर आत्मा प्राणमयः अन्योऽन्यतर आत्मा मनोमयः	(४) अप्राणो ह्यमनाः शुभ्रः
(५) अन्योऽन्यतर आत्मा विज्ञानमयः 'अहं कर्ता, अहं भोक्ता'	(५) अनन्तश्चात्मा विश्वरूपो ह्यकर्ता
(६) अन्योऽन्यतर आत्मा आनन्दमयः प्रज्ञानघन एवानन्दमयः	(६) 'न चास्ति वेत्ता मम चित्सदाहम्' 'चिन्मात्रोऽहं सदाशिव'
(७) असदेवेदमग्र आसीत्	(७) सदेव सौम्येदमग्र आसीत्

किञ्च, 'एष स आत्मा सर्वान्तरः, शरीरं शरीरेषु, प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्, मनसो मे मनो विदुः, यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, न करोति न लिप्यते, सन्ततमेनं ततो विदुः,' इत्यादिश्रुतयोऽपि प्रतिपादयन्तीदमेव यदात्मा पुत्रशरीरेन्द्रियाद्यपेक्षया सर्वथा व्यतिरिक्त। यतो हि पुत्रादिशून्यपर्यन्तं सर्वमेव जडम्। तत्र चैतन्याभासमात्रमेवेति सर्वत्र घटादिष्विवानित्यत्वम्। अतस्तत्प्रकाशकम् 'अहं ब्रह्मास्मी'ति विद्वदनुभूतं प्रबलतमश्रुतिप्रमाणितं नित्यशुद्धबुद्धमुक्तस्वभावञ्च प्रत्यक्चैतन्यमेवात्मा सिध्यति।

विशेषः—कतिपय श्रुतयः पुत्रादीनामात्मत्वं प्रतिपादयन्ति कतिपयाश्च तदनात्मत्वम्; वेदवाक्यत्वन्तूभयोरेवेति पुत्राद्यनात्मकत्वसाधकश्रुतीनामेव प्रामाणिकत्वं तदात्मकत्वसाधकश्रुतीनाञ्चाप्रामाणिकत्वमित्यत्र विनिगमनाविरहः। एवञ्च सति कथं न पुत्राद्यात्मकत्वप्रतिपादकश्रुतीनामेव प्रामाण्यम् तद्बाधकश्रुतीनाञ्चाप्रामाण्यम्, वेदवाक्यत्वेनोभयोरेव समानत्वादिति कथं प्रामाण्याप्रामाण्यनिर्णय इति चेदत्र ब्रूमः—पुत्राद्यात्मकत्वसाधकश्रुतीनां सर्वथाऽप्रामाणिकत्वमितीह

नाशयोऽपि तु अस्थूलम्, अमनाः अकर्ता, इत्यादिश्रुतिविरोधेन तासां स्वार्थे न किमपि तात्पर्यमपि तु स्थूलारुन्धतीन्यायेन पूर्वपूर्वश्रुतिभिस्तत्तन्निराकरणपूर्वकं सूक्ष्मसूक्ष्मवस्तुबोधने एव। इत्थञ्च साक्षात्परम्परया वा तस्यैवाद्वितीयब्रह्मणः प्रतिपादकत्वात्सर्वेषां वेदवाक्यानां प्रामाण्यमिति न मिथो विरोधः। पूर्वोक्त-श्रुतिप्रतिपादितः सूक्ष्मातिसूक्ष्मश्चेतनस्वरूपः, स आत्मा स्वयंप्रकाशः—घटादि-जडपदार्थः स्वप्रकाशनार्थं प्रकाशमपेक्षते किन्तु स चेतन इति तत्प्रकाशनार्थं न प्रकाशान्तरमपेक्षते ? 'अत्रायं पुरुषः स्वयंज्योतिः' 'आत्मैवास्य ज्योतिः', इत्यादिश्रुतयोऽस्य स्वप्रकाशकत्वे प्रमाणम्। चैकोऽप्यनेकत्र वर्तमानः—

(१) एको देवो बहुधा सन्निविष्टः।
(२) उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा।
(३) अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।
(४) एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः।

इत्यादि श्रुतयस्तस्य तथात्वे प्रमाणम्। इत्थञ्चोक्तप्रमाणैरेतत्सिध्यति यद्देहेन्द्रियप्रयाणमनोबुद्ध्यादिविलक्षणस्तदध्यक्षश्चात्मा भिन्न एव। स एव च कर्मफलस्य भोक्ता शुद्धचैतन्यत्वे तद्व्यतिरिक्तम्। तेन च सहैतस्य चैतन्यस्य स्वाभाविकमैक्यम्। आत्मचैतन्यं जाग्रत्स्वप्नसुषुप्त्यवस्थासु अन्नमय–मनोमय–प्राणमय–विज्ञानमयानन्दमयकोशेषु चोपलभ्यते किन्तु शुद्धचैतन्यमेतस्मात्सर्वथा परम्। एवमेव स्थूलसूक्ष्मकारणशरीरव्यष्ट्यभिमानिचैतन्यं (जीवः) विश्वः; तेजसः प्राज्ञ इति चोच्यते तथा तच्छरीरसमष्ट्यभिमानि चैतन्यम् (ईश्वरः) वैश्वानरः (विराट्) सूत्रात्मा (हिरण्यगर्भः) ईश्वरश्चोच्यते। किन्तु नित्य-शुद्धमात्मचैतन्यमेतेभ्यः सर्वेभ्यः परा स्वतन्त्रसत्तेत्यवधेयम् ॥ २० ॥

पुत्रादिकों का आत्मत्वखण्डन—पूर्वोक्त जिन-जिन व्यक्तियों ने पुत्रादिकों की आत्मा सिद्ध करने में जो श्रुतियाँ, युक्तियाँ तथा अनुभव प्रमाणरूप से उद्धृत किये हैं, उनका खण्डन उत्तरोत्तर श्रुतियों युक्तियों तथा अनुभवों से अपने आप हो गया। इस प्रकार पुत्रादि से लेकर शून्य पर्यन्त सब में अनात्मत्व सिद्ध हो जाने पर 'अहं-प्रत्ययविषयक आत्मा कौन है' यह सन्देह बना ही रह जाता है। इसके निवारणार्थ और भी श्रुतियाँ उद्धृत करते हैं तथा उनके द्वारा यह प्रमाणित करते हैं कि पुत्रादिकों के आत्मत्व सिद्ध करने में जो श्रुतियाँ प्रमाण स्वरूप उद्धृत हो गई हैं, उन सब का आगे कही जाने वाली श्रुतियों से बाध हो जाता है, अतः पुत्रादि आत्मा नहीं हो सकते, वरन् अहं

प्रत्ययविषयक आत्मा इनसे भिन्न ही है। पूर्वोक्त प्रत्येक श्रुति के बाधनार्थ एक एक श्रुति यहाँ उद्धृत की जाती है :—

पुत्रादि की आत्मत्वसाधक श्रुतियाँ	पुत्रादि की आत्मत्वबाधक श्रुतियाँ
(१) आत्मा वै जायते पुत्रः[1]	(१) कश्चिद् धीरः प्रत्यगात्मानमैक्षत[2]
(२) स वा एष पुरुषोऽन्नरसमयः[3] (स्थूलोऽहं कृशोऽहम्)	(२) अस्थूलमनण्वह्रस्वमदीर्घम्[4]
(३) ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः[5] (काणोऽहम् बधिरोऽहम्)	(३) अचक्षुःश्रोत्रं तदपाणिपादम्[6]
(४) (i)अन्योऽन्यतर आत्मा प्राणमयः[7] (ii)अन्योऽन्यतर आत्मा मनोमयः[9]	(४) अप्राणो ह्यमनाः शुभ्रः[8]
(५) अन्योऽन्यतर आत्मा विज्ञानमयः	(५) अनन्तश्चात्मा विश्वरूपो ह्यकर्ता[10]
(६) अन्योऽन्यतरआत्मा आनन्दमयः[11] 'प्रज्ञानघन एवमानन्दमयः'	(६) 'न चास्ति वेत्ता मम [12]चित्सदाऽहम्' 'चिन्मात्रोऽहम् सदाशिवः'
(७) असदेवेदमग्र आसीत्[13]	(७) सदेव सौम्येदमग्र आसीत्[14]

पुत्रादि शून्य पर्यन्त सब जड़ है, उसमें चैतन्य का आभास मात्र ही है। घट आदि समस्त दृश्य पदार्थ अनित्य हैं और उनको प्रकाशित करनेवाला 'मैं ब्रह्म हूँ' इस प्रकार का विद्वदनुभूत एवं प्रबलतम श्रुतियों से प्रमाणित नित्य शुद्ध-बुद्ध-मुक्तस्वभाव प्रत्यक् चैतन्य ही आत्मा है।

विशेष—कुछ श्रुतियाँ पुत्रादि को आत्मा कहती है और कुछ श्रुतियाँ उनका विरोध करती हैं। अतः पुत्रादि की आत्मत्वबाधक श्रुतियाँ ही प्रामाणिक हैं और पुत्रादि की आत्मत्वसाधक श्रुतियाँ प्रामाणिक नहीं, ऐसा नहीं कहा जा सकता, क्योंकि श्रुतियाँ वेदवाक्य हैं और वेदवाक्यों में कुछ प्रामाणिक हों कुछ अप्रामाणिक, यह नहीं हो सकता। यदि ऐसा ही है तो पुत्रादि की आत्मा बतलाने वाली श्रुतियों को ही प्रामाणिक तथा उनकी बाधक श्रुतियों को ही

१. कौशी० उ० (२।११) २. कठ० उ० (४।१) ३. तै० उ० (२।१।१)
४. बृहद्० उ० (३।८।८) ५. छा०उ०(५।१।७) ६.मुण्डक०उ०(१।१।६)
७. तै० उ० (२।३।१) ८. मुण्डक उ०(२।१।२) ९. तै० उ० (२।४।१)
१०. श्वेत० उ० (१।९) ११. तै० उ० (२।५।१) १२. कैवल्य उ० (२१)
१३. छा० उ० (६।२।१) १४. छा० उ० (६।२।१)

अप्रामाणिक क्यों नहीं मानते ? वेदवाक्य तो दोनों ही हैं। अतः दोनों में प्राप्राण्याप्रामाण्य निर्णय कैसे किया जा सकता है ? इसका समाधान यह है पुत्रादि की आत्मत्वसाधक श्रुतियाँ सर्वथा अप्रामाणिक हैं, यह बात नहीं। प्रत्युतम् अस्थूलम्, अमना, अकर्त्ता इत्यादि श्रुतियों के विरोध से यह तात्पर्य है कि उनका स्वार्थ में कोई तात्पर्य नहीं अपि तु स्थूलारुन्धती-न्याय से पूर्व, श्रुतियों के निराकरण द्वारा सूक्ष्म-सूक्ष्म वस्तु के समझाने में उनका तात्पर्य है। अरुन्धती बहुत छोटा तारा है, उसे जो न पहचानता हो उसको इतने तारागण में पहचानवाना साधारण बात नहीं। अतः उसके लिए यह युक्ति करते हैं कि पहले उस व्यक्ति को चन्द्रमा दिखलाते हैं और उससे कहते हैं कि यही अरुन्धती है। इसके पश्चात् यह कहते हैं कि चन्द्रमा के पास जो तारा है, वह अरुन्धती है। फिर यह कहते हैं कि उस तारा से भिन्न किन्तु उसी के पास जो सात तारे हैं, उनको अरुन्धती कहते हैं। तदनन्तर उन सातों में से तीन को अरुन्धती और फिर उन तीनों में से बीच वाले को अरुन्धती कहकर उनमें भी अत्यन्त सूक्ष्म तारे को अरुन्धती कहकर उसकी पहचान करवाते हैं।

यहाँ अरुन्धती तारा समझाने के लिए पाँच वाक्यों का आश्रय लिया गया है—

(१) तारा (२) सात तारे (३) तीन तारे (४) मध्यम तारा तथा (५) सूक्ष्म तारा, किन्तु पारस्परिक विरुद्धार्थ प्रतिपादक होने के कारण वे सब अप्रामाणिक नहीं माने जा सकते, क्योंकि समझने वाले की बुद्धि के अनुसार सोपान-आरोहण-न्याय से उत्तरोत्तर चलते (समझते) जाने पर पूर्व पूर्व का परित्याग किया गया है फिर भी सबका तात्पर्य अरुन्धती के प्रतिपादन में ही है।

इसी प्रकार यहाँ पर भी 'अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः आनन्दमयः आत्मा' इत्यादि परस्पर विरुद्धार्थ-प्रतिपादक वाक्य कहे गये हैं। किन्तु समझने वाले की बुद्धि के अनुसार क्रमशः पूर्व-पूर्व का परित्याग करके उत्तरोत्तर परमसूक्ष्मब्रह्म का प्रतिपादन करना ही सबका तात्पर्य है। इसलिए सब वेदवाक्य साक्षात् अथवा परम्परा से उसी अद्वितीय ब्रह्म के प्रतिपादक होने के कारण सभी प्रामाणिक हैं—किसी में विरोध नहीं। इस प्रकार का सूक्ष्मातिसूक्ष्म चेतनस्वरूप वह आत्मा स्वयंप्रकाश है—घटादि जडपदार्थों को प्रकाशित करने के लिए प्रकाश की आवश्यकता होती है पर आत्मा चेतन है

अतः इसको प्रकाशित करने के लिए किसी प्रकाश की आवश्यकता नहीं—'अत्रायं पुरुषः स्वयंज्योतिः' 'आत्मैवास्य ज्योतिः' इत्यादि श्रुतियाँ इसके प्रकाश होने में प्रमाण है। वह आत्मा एक होता हुआ भी अनेक वर्तमान है, ऐसा श्रुतियाँ प्रतिपादन करती हैं—

(१) एको देवो बहुधा सन्निविष्टः।

(२) उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा।

(३) अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।

(४) एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः।

इत्यादि प्रमाणों से यही सिद्ध होता है कि देह, इन्द्रिय, प्राण, मन, बुद्धि, इत्यादि से विलक्षण और उनका अध्यक्ष आत्मा उनसे सर्वथा भिन्न है, वही कर्म-फलों को भोगता है।

शुद्ध चैतन्य इस आत्मा से भिन्न है। उसके साथ इस जीव चैतन्य की स्वभावगत एकता है। आत्मा चैतन्य जाग्रत, स्वप्न तथा सुषुप्ति इन तीनों अवस्थाओं में तथा अन्नमय, मनोमय, प्राणमय, विज्ञानमय एवं आनन्दमय इन पाँचों कोशों में उपलब्ध होता है, परन्तु शुद्ध चैतन्य इन सबसे परे है। इसी प्रकार स्थूलशरीर, सूक्ष्मशरीर तथा कारणशरीर के व्यष्टि अभिमानी चैतन्य (जीव) को विश्व, तैजस तथा प्राण कहते हैं और इन्हीं शरीरों के समष्टि अभिमानी ईश्वर को वैश्वानर (विराट्), सूत्रात्मा (हिरण्यगर्भ) तथा ईश्वर कहते हैं, परन्तु नित्य शुद्ध आत्मचैतन्य (तुरीय चैतन्य) इन सबसे परे स्वतन्त्र सत्ता है॥ २०॥

अपवादः

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्। तदुक्तम्—

'सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः॥' इति।

तथा—एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभुवनान्येतदायतनभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूपं पञ्चीकृतभूतमात्रं भवति। एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति।

एतानि सत्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्तिव्युत्क्रमेण तत्कारणभूताज्ञानोपहित-चैतन्यमात्रं भवति । एतदज्ञानमज्ञानोपहितं चैतन्यञ्चेश्वरादिकमेतदाधारभूतानु-पहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ॥ २१ ॥

कार्यस्य कारणमात्रविशेषणमपवादः—अवस्तुनि सञ्जातायाः वस्तुबुद्धेर-पसारणपूर्वकं सत्यवस्तुमात्रस्थापनमिति भावः । यथा रज्जौ सर्पस्य शुक्तौ रजतस्य वा प्रतीतौ तदपसारणपूर्वकं रज्जुशुक्त्यन्यतरसत्यवस्तुमात्रज्ञापन-मपवादः । एवमेव ब्रह्मरूपसत्यवस्तुनि या अज्ञानादिप्रपञ्चमिथ्याप्रतीतिस्तदप-सारणपूर्वकं ब्रह्मरूपसत्यवस्तुज्ञापनमेवापवादः । यथार्थरूपेणावस्थिते वस्तुनि मिथ्याप्रतीतिरूपान्यथाभावो द्विधा भवति ।

(१) परिणामभावेन (विकारभावेन) (२) विवर्तभावेन च

विवर्तः, अध्यास इति चानर्थान्तरम्, तत्र—(१) परिणामभावः—वस्तुनः स्वयथार्थरूपं परित्यज्य स्वरूपान्तरासक्तिः परिणामः, यथा दुग्धस्य दधिरूपासक्तिः । (२) विवर्तभावः—वस्तुनः स्वरूपापरित्यागेन वस्त्वन्तर-मिथ्या प्रतीतिर्विवर्तः, यथा रज्जावहेः, शुक्तौ रजतस्य वा प्रतीतिः । एतदे-वोभयं निम्नलिखितकारिकायामित्थं प्रतिपादितम्—

सतत्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः ॥

अयं सांसारिकप्रपञ्चो ब्रह्मणो विवर्तो न परिणामः । परिणामस्वीकारे ब्रह्मण्यनित्यत्वादिदोषप्रसङ्गात् । विवर्तस्वीकारे तु नायं दोषः । ब्रह्मरूपसत्य-वस्तुनि प्रपञ्चस्य प्रतीतिर्मिथ्या; तामपसार्य ब्रह्ममात्रप्रतीतिरपवादः । स्वस्व-कारणे सम्पूर्णसांसारिकप्रपञ्चविलयनप्रकारे सम्यग्ज्ञाते सति पूर्वोक्तमिथ्याप्रती-तिर्नश्यति ब्रह्ममात्रं चावशिनष्टि । अयमेव लयप्रकारो मूले तथा हीत्यादिना स्पष्टीकृतः—

दुःखसुखादिभोगायतनमेतच्चतुर्विधसकलस्थूलशरीरजातम्, तद्भोग्यरूप-मन्नपानादिकम्, तदाश्रयभूतं भूतादिचतुर्दशलोकसहितं भुवनत्रयम्, तदाधारभूतं ब्रह्माण्डञ्चैतत्सर्वं स्वकारणरूपपञ्चीकृतमहाभूतेषु विलीयते । तदनन्तरं शब्दा-दिविषयसहितानि पञ्चीकृतमहाभूतानि सप्तदशावयवं सर्वं सूक्ष्मशरीरञ्च स्वकारणभूतापञ्चीकृतमहाभूतेषु विलीयन्ते । ततः सत्त्वादिगुणसहितानि तानि सर्वापञ्चीकृतमहाभूतानि स्वकारणभूतेऽज्ञानोपहितचैतन्ये विलीयन्ते । एतदज्ञानं तदुपहितं सर्वज्ञत्वादिगुणविशिष्टं चैतन्यमीश्वरादि चैतत्स्वाधारभूतानुपहित-

चैतन्यरूपतुरीये ब्रह्मणि विलीयते। इत्थमन्ते सर्वं स्वस्मिन् समावेश्य ब्रह्ममात्रमवशिनष्टि॥

महाभारतीयशान्तिपर्वण्युत्पत्तिव्युत्क्रमेणायं पृथिव्यादीनां परब्रह्मणि लयो 'जगत्प्रतिष्ठा देवर्षे' इत्यारभ्य 'सम्प्रलीयते' इत्यन्तेन प्रतिपादितः॥ २१॥

किसी सत्य वस्तु में भ्रमवश जो असत्य वस्तु का अध्यारोप कर लिया जाता है, उस भ्रम को हटा कर सत्यवस्तु मात्र का स्थापन करना (ज्ञान करना) अपवाद कहलाता है, जैसे रस्सी में सर्प की या शुक्ति में रजत की मिथ्या-प्रतीति होने पर उसको दूर करके रस्सी या शुक्तिरूपी सत्यवस्तु का ज्ञान कराना अपवाद है। इसी प्रकार ब्रह्मरूपी सत्य वस्तु में जो अज्ञानादि प्रपञ्च की मिथ्या प्रतीति है, उसे दूर करके ब्रह्मरूप सत्यवस्तु का भान कराना ही अपवाद है।

यह मिथ्या प्रतीतिरूप अन्यथाभाव दो प्रकार का होता है।

(१) परिणामभाव (विकारभाव) (२) विवर्तभाव

(१) परिणामभाव या विकारभाव—जब कोई वस्तु अपने स्वरूप को छोड़कर किसी दूसरे रूप को ग्रहण कर लेती है, तो उसे परिणामभाव या विकारभाव कहते हैं, जैसे दूध का दही रूप में परिणत हो जाना परिणामभाव या विकारभाव है।

(२) विवर्तभाव—किसी वस्तु में अपने स्वरूप को न छोड़ते हुए दूसरी वस्तु की मिथ्या प्रतीति होना विवर्तभाव कहलाता है, जैसे रस्सी का स्वरूपाऽपरित्यागपूर्वक सर्परूप में मिथ्या प्रतीत होना विवर्त है, यही बात निम्नलिखित कारिका में इस प्रकार कही गई है।

सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोन्यथा प्रथा विवर्त इत्युदाहृतः॥

यह सांसारिक-प्रपञ्च ब्रह्म का विवर्त है, परिणाम नहीं। क्योंकि यदि परिणाम माना जायगा तो ब्रह्मरूप सत्य वस्तु में प्रपञ्च की प्रतीति मिथ्या है। उसको हटाकर ब्रह्ममात्र का भान होना अपवाद है। जब इस बात का भलीभाँति ज्ञान हो जाता है कि यह सम्पूर्ण प्रपञ्च अपने-अपने कारणों में किस प्रकार लीन हो जाता है तो वह मिथ्या प्रतीति नष्ट हो जाती है और अन्त में ब्रह्ममात्र अवशिष्ट रह जाता है। इसी लयप्रकार को 'तथाहि' इत्यादि द्वारा मूलमें इस प्रकार स्पष्ट किया है—

दुःखसुखादि भोगों के भोगने वाले चारों प्रकार के सब स्थूलशरीर इनके भोग्य रूप सब अन्न-पानादि तथा इनके आश्रयभूत भूः इत्यादि चतुर्दश लोक एवं तीन भुवन और उनका आधारभूत ब्रह्माण्ड ये सब अपने कारणरूप पञ्चीकृत महाभूतों में लीन हो जाते हैं। तदनन्तर शब्दादिकों के समेत सब पञ्चीकृत तथा सप्तदशावयव सब सूक्ष्मशरीर पञ्चीकृत महाभूतों में लीन हो जाते हैं। इसके बाद सत्वादि गुणों के समेत वे सब अपञ्चीकृत महाभूत अपने कारणभूत अज्ञानोपहित चैतन्य में लीन होकर तन्मात्र अवशिष्ट रह जाते हैं। यह अज्ञान तथा अज्ञानोपहित सर्वज्ञत्वादिगुणविशिष्ट चैतन्य ईश्वरादि अपने आधारभूत अनुपहित चैतन्यरूप तुरीय ब्रह्म में लीन हो जाता है ॥ २१ ॥

महाभारत शान्तिपर्व में उत्पत्ति व्युत्क्रम से पृथिव्यादि का परब्रह्म में लय निम्नलिखित रूप में वर्णित है:—

जगत्प्रतिष्ठा देवर्षे, पृथिव्यप्सु प्रलीयते।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते।
अव्यक्तं पुरुषे ब्रह्मन्निष्कले सम्प्रलीयते ॥

—(म. भा. शा. प. (१२९–९५)

पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः। (कठ० ३।११)

आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति। तथाहि। अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति। एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति। अज्ञानादिव्यष्टिरेतदुपहितात्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वावभासमानं त्वम्पदवाच्यार्थो भवति। एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ॥ २२ ॥

इत्थमारोपापवादाभ्यां जगति तत्कारणे ब्रह्मणि च सम्यङ्निरूपिते सति श्वेतकेतुम्प्रत्युक्तयोरुद्दालकर्षेः 'तत्त्वमसीति' वाक्यान्तर्गततत्त्वं पदयोः परिशुद्धिरपि सञ्जायते; तथा—अज्ञान-स्थूल सूक्ष्मशरीरसमष्टिस्तदुपहितचैतन्यम्, सर्वज्ञत्वादिविशिष्टेश्वरसूत्रात्मवैश्वानरचैतन्यं तथा एतदनुपहितचैतन्यम् तुरीयं ब्रह्म चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं (तत्वमसीति महावाक्यान्तर्गत)

तत्पदवाच्यार्थो भवति तथा अज्ञानाद्यवच्छिन्नेश्वरादिचैतन्याधारभूतानुपहित-चैतन्यम् अज्ञानाद्यवच्छिन्नेश्वरादिचैतन्याद्भिन्नत्वेनावभासमानं, तत्पदलक्ष्यार्थो भवति। एवमेवाज्ञानादिव्यष्टिस्तदवच्छिन्नप्राज्ञादिचैतन्यम्, तदनुपहितचैतन्य-ञ्चेत्येतत्त्रयं तप्ताय.पिण्डवदभिन्नत्वेनावभासमानं (तत्त्वमसीति महावाक्या-न्तर्गत) त्वंपदवाच्यार्थो भवति तथा अज्ञानादिव्यष्टिस्तदवच्छिन्नप्राज्ञादि चैतन्यं तथा तदाधारभूतमनुपहितप्रत्यगात्मतुरीयचैतन्यैतत्त्रयं भिन्नत्वेनाव-भासमानं सत् त्वं पदलक्ष्यार्थो भवति।

इदमत्रावधेयम्—तत्त्वंपदयोर्वाच्यार्थलक्ष्यार्थरूपा प्रत्येकमर्थद्वयी। तत्राज्ञाना-दिसमष्टिस्तया तदुपहितं सर्वज्ञत्वादिविशिष्टमीश्वरहिरण्यगर्भवैश्वानरचैतन्यमेव-मेतदनुपहितं यदक्षरं चिन्मात्रमेतत्त्रयं तप्ताय:पिण्डवदविविक्तमिति तत्पद-वाच्यार्थः, तथा अज्ञानतत्कार्यसमस्तप्रपञ्चेषु सत्तास्फूर्तिप्रदायकत्वेन सर्वत्रा-नुस्यूतमिति ततो भिन्नमीश्वरादिचैतन्याधारभूतं यदानन्दस्वरूपमनुपहितचैतन्यं तत् तत्पदलक्ष्यार्थः।

एवमेवाज्ञानादिव्यष्टिस्तथा तदुपहितमल्पज्ञत्वादिविशिष्टं यत्प्राज्ञतैजसविश्व-चैतन्यमेवमेतदाधारभूतं यदनुपहितचैतन्यमेतद्वयं तप्ताय:पिण्डवदविविक्त-मिति त्वंपदवाच्यार्थः, तथा अज्ञानादिव्यष्टिस्तदुपाध्युपहितं यत्प्राज्ञतैजस-विश्वचैतन्यं यदाधारभूतं यदनुपहितप्रत्यगानन्दं तुरीयं चैतन्यं तद्विविक्तमिति त्वंपदलक्ष्यार्थः। इत्थमनुपहितं चैतन्यं (शुद्धचैतन्यम्) तत्त्वमित्युभयोः पदयोर्लक्ष्यार्थः। अतएव तत्त्वमिति पदद्वयं लक्षणं शुद्धचैतन्यञ्च लक्ष्यमिति तत्त्वम् ॥ २२ ॥

इस प्रकार अध्यारोप और अपवाद के द्वारा जब यह बात बिल्कुल स्पष्ट हो जाती है कि यह सम्पूर्ण नामरूपात्मक जगत् ब्रह्म है, एवं ब्रह्म ही यह सब नामरूपात्मक जगत् है तो छान्दोग्य उपनिषद् में उद्दालक ऋषि के द्वारा श्वेतकेतु से कहे हुए 'तत्त्वमसि' इस वाक्य में तत् (वह परब्रह्म शुद्ध चैतन्य) और त्वं (व्यष्टिभूताज्ञानोपहितचैतन्य) का तात्पर्य भी स्वतः स्पष्ट हो जाता है अर्थात् अज्ञान एवं कारण, सूक्ष्म, स्थूलशरीर की समष्टि, तदुपहित चैतन्य—सर्वज्ञत्वादिविशिष्ट ईश्वर, सूत्रात्मा और वैश्वानर चैतन्य तथा एतदनुपहितचैतन्य (तुरीयचैतन्य) इन सबका तप्ताय:पिण्ड के समान एक रूप से अवभासित होना 'तत्' पद का वाच्यार्थ है; तथा अज्ञानावच्छिन्न ईश्वर चैतन्य का आधारभूत जो अनुपहित चैतन्य उसका अज्ञान एवं तद-

वच्छिन्न ईश्वर चैतन्य से विविक्त होकर भिन्न-भिन्न अवभासित होना तत्पद का लक्ष्य अर्थ है।

इसी प्रकार अज्ञान तथा कारण, सूक्ष्म, स्थूल शरीरों की व्यष्टि एवं प्राज्ञ, तैजस तथा विश्वचैतन्य और तदनुपहित चैतन्य इन तीनों का तप्ताय:पिण्ड के समान अभेद विवक्षा में एक रूप से अवभासित होना 'त्वम्' पद का वाच्यार्थ है तथा व्यष्टिभूत जो अज्ञान आदि एवं तदुपहित जीव चैतन्य तथा इनका आधारभूत जो अनुपहित प्रत्यगात्मकतुरीय चैतन्य इन सबका भेद विवक्षा में अलग-अलग प्रतीयमान होना 'त्वम्' पद का लक्ष्य अर्थ है।

तात्पर्य यह कि तद् और त्वम् पदों में से प्रत्येक के दो-दो अर्थ हैं—एक वाच्यार्थ, दूसरा लक्ष्यार्थ। अज्ञानसमष्टि तथा तदवच्छिन्न ईश्वर, हिरण्यगर्भ और वैश्वानरचैतन्य तथा इनसे अनुपहित जो अक्षर, चिन्मात्र ये तीनों तप्ताय:पिण्ड के समान एक ही हैं, यह तद् शब्द का वाच्यार्थ है तथा अज्ञान (माया) और उसके कार्यरूप समस्त प्रपञ्च को सत्ता एवं स्फूर्ति प्रदान करने वाली ईश्वरादि चैतन्य की आधारभूत जो चेतन एवं आनन्दस्वरूप अनुपहित चैतन्य वस्तु वह तत्पद का लक्ष्य अर्थ है। इसी प्रकार व्यष्टिभूत अज्ञान तथा तदवच्छिन्न अल्पज्ञत्वादि विशिष्ट जो प्राज्ञ, तैजस एवं विश्वचैतन्य और इनका आधारभूत जो अनुपहित चैतन्य ये तीनों तप्ताय:पिण्ड के समान एक ही हैं, यह त्वम् पद का वाच्य अर्थ है तथा अज्ञानादि उपाधियों से उपहित जो प्राज्ञ, तैजस और विश्व तथा इनका आधारभूत जो अनुपहित प्रत्यगानन्द तुरीय चैतन्य ये अलग हैं, यह त्वम् पद का लक्ष्य अर्थ है। इस प्रकार अनुपहित चैतन्य (शुद्धचैतन्य) तद् और त्वम् इन दोनों का लक्ष्य अर्थ है, इसी कारण तद् और त्वम् ये दोनों लक्षण हैं और शुद्ध चैतन्य लक्ष्य हैं॥ २२॥

महावाक्यार्थः

अथ महावाक्यार्थो वर्ण्यते। इदं तत्त्वमसीति वाक्यं सम्बन्धत्रयेणाखण्डार्थ-बोधकं भवति। सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषण-विशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति। तदुक्तम्—

'सामानाधिकरण्यञ्च विशेषणविशेष्यता।

लक्ष्यलक्षण सम्बन्धः पदार्थप्रत्यगात्मनाम्'॥ इति

सामानाधिकरण्यसम्बन्धस्तावद्यथा 'सोऽयं देवदत्त' इत्यस्मिन् वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन् पिण्डे तात्पर्यसम्बन्धः। तथा च तत्त्वमेवासीति वाक्येऽपि परोक्षत्वादि, विशिष्टचैतन्यवाचक तत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वम्पदस्य चैकस्मिश्चैतन्ये तात्पर्यसम्बन्धः।

विशेषणविशेष्यभावसम्बन्धस्तु तथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योऽन्यभेदव्यावर्तकतया, विशेषणविशेष्यभावः। तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वं, पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योऽन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः।

लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथाऽत्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव भागलक्षणेत्युच्यते ॥ २३ ॥

वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वात् 'तत्त्वमसि' इति वाक्यार्थं प्रतिपिपादयिषुर्ग्रन्थकारः पूर्वं तत्त्वमसीति महावाक्यान्तर्गततत्त्वं-पदार्थं सप्रपञ्चं निरूप्याधुना तत्त्वमसीति महावाक्यार्थं निरूपयितुमाह—अथेति।

जीवोऽल्पज्ञः, ईश्वरश्च सर्वज्ञ इत्यनयोः परस्परमतितरां भिन्नत्वेन तदैक्यप्रतिपादकतत्त्वमसीति वाक्यस्यापि विरुद्धार्थकत्वात्कथमखण्डैकरसब्रह्मणः प्रतिपादकत्वमित्यत आह—इदमिति। तत्त्वमसीति वाक्यस्य साक्षादखण्डैकरसब्रह्मणः प्रतिपादकत्वाभावेऽपि लक्षणया सम्बन्धत्रयेणाखण्डार्थप्रतिपादकत्वमिति भावः तच्च सम्बन्धत्रयमेतत्—

(१) पदयोः (तत्-त्वं पदयोः) सामानाधिकरण्यम्;

(२) पदार्थयोः (परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्ययोः) विशेषणविशेष्यभावः।

(३) परोक्षत्वापरोक्षत्वादिविशिष्टत्वरूपविरुद्धांशपरित्यागपूर्वकतत्त्वंपदलक्ष्याविरुद्धचैतन्येन सह तत्त्वंपदयोस्तदर्थयोर्वा लक्ष्यलक्षणभावः।

परोक्षत्वसर्वज्ञत्वादिविशिष्टचैतन्यावबोधकतच्छब्दस्य तथा अपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टचैतन्यावबोधकत्वंशब्दस्य च यः परोक्षत्वापरोक्षत्वसर्वज्ञत्वकिञ्चिज्ज्ञत्वादिरूपो विरुद्धोंऽशस्तत्परित्यागपूर्वकं तत्त्वंपदे पदार्थौ वाऽख-

ण्डमेव लक्षयत इति तयोर्लक्षणत्वम् । अखण्डचैतन्यञ्च ताभ्यां लक्ष्यते इति तस्य लक्ष्यत्वम् । नैष्कर्म्यसिद्धावेतदेव 'सामानाधिकरण्यञ्चे'त्यादिना प्रतिपादितम् । सम्बन्धत्रयेण चैतत्तत्त्वमसीति वाक्यं यथाऽखण्डार्थं प्रतिपादयति तद् 'सोऽयं देवदत्त' इति लौकिकोदाहृत्या सहेह निर्दिश्यते—

(१) समानाधिकरणसम्बन्धः—भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे तात्पर्यसम्बन्धः समानाधिकरण्यम् । तच्च सोऽयं देवदत्त इति वाक्ये इत्थं सङ्घटते—अत्र सः, अयम्, देवदत्त इति पदत्रयम् । तत्र स-शब्दस्य तत्कालतद्देशविशिष्टरूपेऽर्थे प्रवृत्तिः । अयं-शब्दस्य चैतत्कालैतद्देशविशिष्टरूपेऽर्थे प्रवृत्तिः । एवमुभयोः शब्दयोर्भिन्नप्रवृत्तिनिमित्तत्वम् । तयोश्चोभयोप दयोर्देवदत्तरूपैकव्यक्तिबोधने एव तात्पर्यमिति भिन्नप्रवृत्तिनिमित्तयोरपि तदिदंशब्दयोरेकार्थविबोधनतात्पर्येणोच्चरितत्वादुभयोः सामानाधिकरण्यम् । एवमेव तद् (अखण्डचैतन्यम्) त्वमसीत्यर्थके तत्त्वमसीति वाक्येऽपि परोक्षत्वसर्वज्ञत्वादिविशिष्टरूपेऽर्थे तत्पदस्य प्रवृत्तिः, अपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टरूपेऽर्थे च त्वंपदस्य प्रवृत्तिः । एवं भिन्नप्रवृत्तिनिमित्तयोरपि तत्त्वंपदयोरेकाखण्डचैतन्यावबोधनतात्पर्येणोच्चरितत्वादुभयोः सामानाधिकरण्यम् । इत्थं सामानाधिकरणसम्बन्धेन तत्पदं त्वंपदञ्चैकमेवाखण्डचैतन्यं बोधयतः ।

(२) विशेषणविशेष्यभावसम्बन्धः—व्यवच्छेदकम् (व्यावर्तकम्) विशेषणम्, व्यवच्छेद्यञ्च (व्यावर्त्यञ्च) विशेष्यम् । इत्यञ्च 'सोऽयं देवदत्तः' इति वाक्ये अयंशब्दवाच्यो योऽयमेतत्कालैतद्देशसम्बन्धविशिष्टो देवदत्तः सः स तु तच्छब्दवाच्यतत्कालतद्देशसम्बन्धविशिष्टदेवदत्ताद्भिन्नो नेति यदा बोधो भवति तदा यच्छब्दार्थस्येदंशब्दनिष्ठभेदव्यवच्छेदकत्वेन विशेषणत्वम्, अयंशब्दार्थस्य च व्यवच्छेद्यत्वाद्विशेष्यत्वम् इत्ययं स एव देवदत्त इत्यर्थावगमात् तत्कालतद्देशसम्बन्धविशिष्टदेवदत्तादन्यो देवदत्तो व्यवच्छिद्यते । एवमेव स इति तच्छब्दवाच्यस्तत्कालतद्देशसम्बन्धविशिष्टो यो देवदत्तः सः अयमितीदंशब्दवाच्यादेतत्कालैतद्देशसम्बन्धविशिष्टाद् देवदत्तादन्यो नेति यदाप्रतीतिस्तदा इदंशब्दार्थस्य तच्छब्दार्थनिष्ठभेदव्यवच्छेदकतया अयमेव स इत्यर्थावगमादयंशब्दस्य विशेषणत्वम्, सशब्दार्थस्य च व्यवच्छेद्यतया विशेष्यत्वमिति पारस्परिकभेदव्यावर्तकतया इदंशब्दस्तच्छब्दश्च 'अयमेव सः, स एवायम्' इत्यमन्योऽन्यविशेषणविशेष्यभावसम्बन्धेन देवदत्तपिण्डरूपमेकमेवार्थमवगमयतोऽतस्तयोर्विशेषणविशेष्यभावः ।

तत्त्वमसीति वाक्ये त्वयं सम्बन्ध इत्थम्—त्वंपदवाच्यं यदपरोक्षत्वाल्पज्ञत्वादि-विशिष्टं चैतन्यं तत् तत्पदवाच्यात्सर्वज्ञत्वादिविशिष्टचैतन्यादन्यन्नेति यदा प्रतीतिस्तदा तच्छब्दार्थस्य त्वंपदार्थनिष्ठभेदव्यवच्छेदकतया विशेषणत्वम्, त्वंपदार्थस्य च व्यवच्छेद्यत्वात् विशेष्यम्। एवं त्वं तदेव चैतन्यमसीत्यर्थावगमः। तथा च तत्पदवाच्य यत्सर्वज्ञत्वादिविशिष्टं चैतन्यं तत्त्वंपदवाच्यादल्पज्ञत्वादि-विशिष्टचैतन्याद्भिन्नं नेति यदा बोधस्तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्य-वच्छेदकत्वेन विशेषणत्वम्, तत्पदार्थस्य व्यवच्छेद्यत्वाद्विशेष्यत्वमिति तच्चैतन्यं त्वमेवासीत्यर्थावगमः इत्थञ्च तत्त्वमसीत्यत्र तत्त्वमित्युभयोः पदार्थयोः 'त्वं तदसि, तत्त्वमसि' इत्यनया रीत्या पारस्परिकभेदव्यावर्तकत्वेन तच्छब्दस्त्वंशब्दश्चैकमेव चैतन्यमवगमयतोऽतोद्वयोर्विशेषणविशेष्यभावः।

(३) लक्ष्यलक्षणभावः—सोऽयं देवदत्त इति वाच्ये तत्कालतद्देश-सम्बन्धविशिष्टैतत्कालैतद्देशसम्बन्धविशिष्टरूपविरुद्धांशपरित्यागेन सोऽयं-शब्दयोस्तदर्थयोर्वाऽविरुद्धदेवदत्तपिण्डेन सह लक्ष्यलक्षणभावः अर्थात्—उक्तवाक्ये तच्छब्दस्य तत्कालतद्देशविशिष्टरूपोऽर्थः, इदंशब्दस्य चैतत्कालैतद्देशविशिष्ट-रूपोऽर्थः इत्यनयोर्विरुद्धार्थकत्वेऽपि तत्कालतद्देशैतत्कालैतद्देशरूपविरुद्धांश-परित्यागेनाविरुद्धदेवदत्तपिण्डरूपैकार्थावबोधकतया सोऽयंपदयोर्लक्षणत्वञ्च, देवदत्तपिण्डस्य च लक्ष्यत्वम्। एवं तत्त्वमसीत्यत्रापि तत्त्वंपदयोस्तदर्थयोर्वा परोक्षत्वापरोक्षत्वसर्वज्ञत्वाल्पज्ञत्वादिरूपविरुद्धांशपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। त्यक्तविरुद्धांशयोस्तत्त्वंपदयोः पदार्थयोर्वा लक्षणत्वम्, अखण्डचैतन्यस्य च लक्ष्यत्वमिति तत्त्वम्। इत्थमत्र विरुद्धांशपरित्यागेन यदविरुद्धचैतन्यावबोधकत्वं तत्केवलं संज्ञाभेदेन भागलक्षणा जहदजहल्लक्षणा वा उच्यते ॥ २३ ॥

महावाक्यार्थनिरूपण—वाक्यार्थज्ञान में पदार्थज्ञान कारण होता है—किसी भी वाक्य का अर्थ जानना हो तो पहले उसके प्रत्येक पद के अर्थ को जानना आवश्यक है। अतः यहाँ तक 'तत्त्वमसि' इस वाक्य में प्रयुक्त होने वाले तत् और त्वम् इन पदों के अर्थ का निरूपण किया गया, अब आगे 'तत्त्वमसि' इस सम्पूर्णवाक्य के अर्थ का निरूपण करते हैं।

जीव अल्पज्ञ है, ईश्वर सर्वज्ञ है, इन दोनों की परस्पर अतीव भिन्नता है। अतः इनकी एकता के प्रतिपादक 'तत्त्वमसि' इत्यादि वाक्य भी परस्पर विरुद्धा-र्थक होने के कारण अखण्डैकरस ब्रह्म का प्रतिपादन कैसे कर सकते हैं।

इस सन्देह को इदं त्वमसि—इत्यादि के द्वारा दूर करते हैं, अर्थात् तत्त्वमसि यह वाक्य साक्षात् अखण्ड ब्रह्म का प्रतिपादन नहीं करता, किन्तु लक्षणाशक्ति के द्वारा तीन सम्बन्धों से यह अखण्डैकार्थं प्रतिपादन करता है। वे तीन सम्बन्ध निम्नलिखित हैं—

(१) पदों का अर्थात् तत् और त्वम् पदों का सामानाधिकरण्य;

(२) पदार्थों का अर्थात् तत् पदार्थ—परोक्षत्वादिविशिष्टचैतन्य तथा त्वम् पदार्थ अपरोक्षत्वादिविशिष्टचैतन्य का विशेषणविशेष्यभावसम्बन्ध;

(३) परोक्षत्वापरोक्षत्वादिविशिष्टत्वरूपविरुद्धांश से रहित तत् और त्वम् पदों या पदार्थों का अविरुद्ध चैतन्य के साथ लक्ष्यलक्षणभावसम्बन्ध।

तात्पर्य यह कि प्रत्यगात्मलक्षण अर्थात् जीव चैतन्य तथा शुद्ध चैतन्य के बोधक जो त्वम् और तत् पद उनका अखण्ड चैतन्य के साथ लक्ष्यलक्षणभाव सम्बन्ध है—परोक्षत्व सर्वज्ञत्वादिविशिष्टचैतन्य के लक्षण (बोध करानेवाले) तत् शब्द तथा अपरोक्षत्व—किञ्चिज्ज्ञत्वादिविशिष्टचैतन्य के लक्षण (बोध-करानेवाले) त्वं शब्द में जो परोक्षत्वापरोक्षत्व तथा सर्वज्ञत्वकिञ्चिज्ज्ञत्वादि विरुद्ध अंश हैं। उनसे रहित ये दोनों पद, पदार्थ अखण्डचैतन्य के लक्षण हैं और अखण्डचैतन्य लक्ष्य है।

इस प्रकार इन तीनों सम्बन्धों से 'तत्त्वमसि' यह वाक्य उसी एक अखण्ड अर्थ (ब्रह्म) का प्रतिपादक है। यही बात नैष्कर्म्यसिद्धि में 'सामानाधि-करण्यञ्च···' इत्यादि रूप से कही गई है। इन तीनों सम्बन्धों के 'द्वारा तत्त्व-मसि यह वाक्य किसी प्रकार अखण्ड अर्थ का प्रतिपादक है, इसका विवेचन 'सोऽयं देवदत्तः' इस लौकिक उदाहरण के साथ नीचे किया जाता है।

(१) समानाधिकरणसम्बन्ध—भिन्न-भिन्न अर्थवाले पदों का एक ही अर्थ में तात्पर्यावबोध करानेवाला सम्बन्ध समानाधिकरणसम्बन्ध कहलाता है। 'सोऽयं देवदत्तः' इस वाक्य में तत् पद का तत्काल-तद्देश-विशिष्टरूप अर्थ है। तथा अयं शब्द का एतत्काल-एतद्देश विशिष्टरूप अर्थ है, इन दोनों पदों का देवदत्त पिण्डरूप एक ही अर्थ प्रकट करना तात्पर्य है, अतः इस तात्पर्य का अवबोधक सम्बन्ध समानाधिकरण सम्बन्ध हुआ।

इसी प्रकार 'तत्त्वमसि' इस वाक्य में भी 'तत्' पद का परोक्षत्वसर्वज्ञ-त्वादिविशिष्टरूप अर्थ है तथा त्वं पद का अपरोक्षत्व किञ्चिज्ज्ञत्वादिविशिष्ट-रूप अर्थ है और इन दोनों पदों का एक ही चैतन्यरूप अर्थ के बोध कराने में

तात्पर्य है। अतः इस तात्पर्य का अवबोधक सम्बन्ध समानाधिकरण सम्बन्ध हुआ। इस प्रकार समानाधिकरण सम्बन्ध के द्वारा तत् और त्वम् ये दोनों पद एक ही अखण्ड अर्थ ब्रह्म का प्रतिपादन करते हैं।

(२) विशेषणविशेष्यभावसम्बन्ध—जो शब्द अपने विशेष्य को अन्य शब्दों से व्यावृत्त कर देता है, उसे विशेषण कहते हैं और जो शब्द व्यावृत्त हो जाता है, उसे विशेष्य कहते हैं। सोऽयं देवदत्तः—इस वाक्य में अयं शब्द-वाच्य जो यह एतत्काल-एतद्देशविशिष्ट देवदत्त है, वह 'सः' इस तत्—शब्दवाच्य तत्काल तद्देशविशिष्ट देवदत्त-पिण्ड से भिन्न नहीं है, जब इस प्रकार का बोध होता है तो तत् शब्द इदं शब्द का विशेषण है और इदं शब्द तत् शब्द का विशेष्य है। अतः 'यह वही देवदत्त है' इस प्रकार का बोध होता है और तत्कालतद्देशविशिष्ट देवदत्त से अन्य देवदत्त की व्यावृत्ति हो जाती है।

इसी प्रकार तत्शब्दवाच्य-तत्काल तद्देशविशिष्ट जो देवदत्त वह इदंशब्द-वाच्य एतत्काल एतद्देशविशिष्ट देवदत्त से भिन्न नहीं अर्थात् 'यही वह देवदत्त है' जब यह अर्थ प्रतीत होता है तो अयं शब्द सः शब्द का विशेषण है और 'सः' शब्द विशेष्य है। अतः परस्पर भेदव्यावर्तक होने के कारण 'स एवायम् अयमेव सः' इस प्रकार सः और अयम् दोनों एक-दूसरे के विशेषणविशेष्य हो जाते हैं और विशेषणविशेष्यभाव सम्बन्ध के द्वारा देवदत्त पिण्डरूप एक ही अर्थ को प्रकट करते हैं।

इसी प्रकार 'तत्त्वमसि' इस वाक्य में 'त्वम्' पदवाच्य जो अपरोक्षत्व किञ्चिज्ज्ञत्वादिविशिष्ट चैतन्य वह 'तत्' पदवाच्य सर्वज्ञत्वादिविशिष्ट चैतन्य से भिन्न नहीं, जब यह बोध होता है, तब तत्शब्दार्थ त्वंपदार्थनिष्ठ भेद का व्यावर्तक होने के कारण विशेषण है और 'त्वम्' पदार्थ व्यावर्त्य होने के कारण विशेष्य है, एवं 'तत्' पदवाच्य जो सर्वज्ञत्वादिविशिष्टचैतन्य वह 'त्वम्' पदवाच्य अल्पज्ञत्वादि विशिष्ट चैतन्य से भिन्न नहीं, जब यह प्रतीति होती है तब 'त्वम्' पदार्थ तत्पदार्थनिष्ठ भेद का व्यावर्तक होने के कारण विशेषण है तथा तत्पदार्थ व्यावर्त्य होने के कारण विशेष्य है। इस विशेषणविशेष्यभाव सम्बन्ध के द्वारा तत् और त्वं ये दोनों पद चैतन्यरूप एक ही अर्थ के बोधक होने के कारण 'वही तू, तू ही वह' ऐसी प्रतीति होती है।

(३) लक्ष्यलक्षणभावसम्बन्ध—'सोऽयं देवदत्तः' इस वाक्य में तत्काल-तद्देशविशिष्ट तथा एतत्काल-एतद्देशविशिष्टरूप विरुद्ध अर्थ के परित्याग

द्वारा 'स.' और 'अयं' शब्द अविरुद्ध देवदत्तत्वविशिष्टदेवदत्त पिण्ड के साथ-साथ देवदत्तत्वविशिष्ट देवदत्तशब्द को लक्षित करते हैं, अतः इनका लक्ष्य–लक्षणभाव सम्बन्ध है–'सः' शब्द का तत्कालतद्देशविशिष्टरूप अर्थ है; 'अयं' शब्द का एतत्काल, एतद्देशविशिष्टरूप अर्थ है; इस प्रकार ये दोनों विरुद्धार्थक हैं' जो तत्काल तद्देशविशिष्ट है, वह एतत्काल एतद्देशविशिष्ट कैसे हो सकता है ? किन्तु ये दोनों देवदत्तरूपी एक ही पिण्ड का बोध कराते हैं, अतः देवदत्तरूप अर्थ के बोध कराने में इन दोनों में कोई पारस्परिक विरोध नहीं, क्योंकि 'सः' शब्द भी देवदत्त का बोधक है और 'अयं' शब्द भी देवदत्त का ही बोधक है। इसलिए तत्काल तद्देश एवं एतत्काल एतद्देशरूपविरुद्धांश का परित्याग कर देने से दोनों पद देवदत्तपिण्डरूप एक ही अर्थ के बोधक रह जाते हैं। इस प्रकार इन दोनों का लक्ष्यलक्षणभाव संगत होता है अर्थात् 'सः' और 'अयं' पद लक्षण हैं, एवं अविरुद्ध देवदत्तपिण्ड लक्ष्य है।

इसी प्रकार 'तत्वमसि' इस वाक्य के 'तत्' और 'त्वम्' पदों या पदार्थों का सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिरूप विरुद्धांश परित्याग कर देने से अखण्डचैतन्य के साथ पारस्परिक लक्ष्यलक्षणभाव संगत होता है अर्थात् 'तत्' और 'त्वं' पद लक्षण हैं, एवं अखण्डचैतन्य लक्ष्य है।

इसी लक्ष्यलक्षणभाव को भागलक्षणा भी कहते हैं अर्थात् 'तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा' इत्यादि शास्त्रीयस्थलों में जो भागलक्षणा के द्वारा चैतन्यावबोध कराया गया है, वह इसी का नामान्तर मात्र है। इसी को जहदजहल्लक्षणा भी कहते हैं अर्थात् जिसमें कुछ अंश त्याग दिया जाय और कुछ अंश ग्रहण कर लिया जाय, उसे भागलक्षणा या जहदजहल्लक्षणा कहते हैं 'तत्त्वमसि' इस महावाक्य में 'तत्' शब्द का सर्वज्ञत्वादिविशिष्ट चैतन्यरूप अर्थ है, 'त्वम्' शब्द का अल्पज्ञत्वादिविशिष्ट चैतन्यरूप अर्थ है। इन दोनों के विरुद्धांश अल्पज्ञत्वसर्वज्ञत्वादिरूप भाग को त्याग कर चैतन्यांशमात्र का ग्रहण किया जाता है, तभी 'तत्' और 'त्वम्' ये दोनों एक अखण्ड अविरुद्ध चैतन्य के बोधक होते हैं ॥ २३ ॥

अस्मिन् वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते। तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिभेदव्यावर्तकतयाऽन्योऽन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविरोधाभावात्तद्वाक्यार्थः सङ्गच्छते, अत्र तु

तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्यो-न्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य च वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते। तदुक्तम्—

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः॥ २४॥

ननु यथा नीलोत्पलमित्यत्र नीलगुणस्योत्पलद्रव्यस्य च स्वव्यतिरिक्तशुक्लादि गुणान्तरपटादिद्रव्यान्तरव्यावर्तकत्वेन विशेषणविशेष्यभावनिरूपिततद्भिन्नसंसर्गो-वाक्यार्थः (नीलमुत्पलमित्यनयोर्विशेषणविशेष्यभावरूपेण संसर्गेण वाक्यार्थाव-बोधः) नीलगुणविशिष्टं यत्तदेवोत्पलमित्येवविशिष्टो वा वाक्यार्थावबोधस्तथा 'तत्त्वमसी'ति वाक्येऽपि परोक्षत्वसर्वज्ञत्वादिविशिष्टेश्वरचैतन्यस्य तत्पदार्थस्य, अपरोक्षत्वाल्पज्ञत्वादिविशिष्टजीवचैतन्यस्य त्वंपदार्थस्य चान्योन्यभेदव्यावर्तक-तया, तत् अर्थात् परोक्षत्वसर्वज्ञत्वादिविशिष्टेश्वरचैतन्यम् त्वम् अर्थात् अपरोक्षत्वाल्पज्ञत्वादिविशिष्टजीवचैतन्यम्, अथ च त्वम् (अपरोक्षत्वाल्पज्ञ-त्वादिविशिष्टजीवचैतन्यम्) तत् (परोक्षत्वसर्वज्ञत्वादिविशिष्टं चैतन्यम्) असि। एवमन्योन्यविशेषणीभूतसर्वज्ञत्वकिञ्चिज्ज्ञत्वोभयनिरूपितसंसर्गः, यत्सर्वज्ञ-त्वादिविशिष्टं तदेवाल्पज्ञत्वादिविशिष्टमेवं यदल्पज्ञत्वादिविशिष्टं तदेव सर्वज्ञ-त्वादिविशिष्टमेवं विशिष्टो वा वाक्यार्थः कथं नेष्यत आह—अस्मिन्निति। नीलोत्पलमिति दृष्टान्तवाक्ये 'तत्त्वमसी'ति दार्ष्टान्तिकवाक्ये च महानेव भेद इति नीलोत्पलवदिह तत्त्वमसीत्यत्र संसर्गविशिष्टो वा वाक्यार्थो न सङ्गच्छते इति भावः। यतो हि नीलोत्पलमित्यत्र 'नीलम्' इति गुणः, 'उत्प-लमि'ति च द्रव्यम् (गुणी) अतो गुणगुणिनोस्तयोर्विशेषणविशेष्यभावसंसर्गः, नीलगुणविशिष्टं यत्तदेवोत्पलद्रव्यम् इति नीलगुणविशिष्टस्योत्पलद्रव्यस्य चैकतारूपविशिष्टो वा वाक्यार्थः सङ्गच्छते, किन्तु 'तत्त्वमसी'ति वाक्ये तत्पदं त्वं पदञ्चोभयं द्रव्यमिति संसर्गो वा विशिष्टो वा संसर्गविशिष्टयोरन्यतरः उभयो वा सम्बन्धो वक्तुं न शक्यते द्वयोर्द्रव्ययोर्विशेषणविशेष्यसंसर्गासम्भवात्, परोक्षत्वादिविशिष्ट यत्तदेवापरोक्षत्वादिविशिष्टमित्येवं विशिष्टार्थकल्पने विरोधस्य प्रत्यक्षात्वच्चेतिपूर्वोक्तविशेषणविशेष्यभावप्रकारेणैव 'तत्त्वमसी'ति वाक्यमविरुद्धचैतन्यं बोधयति। 'संसर्गो वा विशिष्टो वा' इति पञ्चदशी-कारिकाऽपीदमेवं समर्थयति॥ २४॥

'तत्त्वमसि' इस वाक्य में 'नीलम् उत्पलम्' इस वाक्य की तरह विशेषण-विशेष्यभाव नहीं हो सकता, क्योंकि 'नीलमुत्पलम्' और 'तत्त्वमसि' इन दोनों वाक्यों में अन्तर है। नीलमुत्पलम् में नील गुण है और उत्पल गुणी (द्रव्य) है। अतः इन दोनों (गुण-गुणी) का विशेषण-विशेष्यभाव संसर्ग या जो नीलगुण-विशिष्ट है वही उत्पल है इस प्रकार इन दोनों का विशिष्ट वाक्यार्थ स्वीकार करने में कोई विरोध नहीं, वही संसर्ग या विशिष्ट वाक्यार्थ ठीक है, किन्तु तत्त्वमसि इस वाक्य में 'तद्' और 'त्वं' ये दोनों द्रव्य हैं, अतः यहाँ पर संसर्ग या विशिष्ट वाक्यार्थ सम्भव नहीं, क्योंकि तत्पद का अर्थ है परोक्षत्वादिविशिष्ट चैतन्य और त्वं-पद का अर्थ है अपरोक्षत्वादिविशिष्ट चैतन्य। इस कारण दो द्रव्यों का विशेषण-विशेष्यभावरूप संसर्ग या जो 'नीलगुण विशिष्ट वही उत्पल' की तरह 'परोक्षत्वादिविशिष्ट जो चैतन्य वही अपरोक्षत्वादिविशिष्ट चैतन्य' इस प्रकार विशिष्ट वाक्यार्थ की कल्पना नहीं की जा सकती, क्योंकि जो तत्पदवाच्य परोक्षत्वादिविशिष्ट सर्वज्ञ चैतन्य है, वह 'त्वं' पदवाच्य अपरोक्षत्वादिविशिष्ट अल्पज्ञ जीव चैतन्य नहीं हो सकता। इस कारण पूर्वोक्त 'सामानाधिकरण्यम्'—इत्यादि के द्वारा 'तत्त्वमसि' यह महावाक्य अखण्डैकरस ब्रह्म का बोधक है। 'संसर्गो या विशिष्टो'—इत्यादि यह पञ्चदशी की कारिका यही बात स्पष्ट करती है ॥ २४ ॥

अत्र 'गङ्गायां घोषः प्रतिवसती'ति वाक्यवज्जहल्लक्षणापि न सङ्गच्छते। तत्र तु गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते। अत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न सङ्गच्छते। न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं वा लक्षयत्यतः कुतो जहल्लक्षणा न सङ्गच्छत इति वाच्यम्। तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात् ॥ २५ ॥

(१) जहल्लक्षणानिराकृतिः—ननु 'गङ्गायां घोष' इत्यत्रैव 'तत्त्वमसी'-त्यत्रापि न जहल्लक्षणयैवाखण्डैकरसब्रह्मबोधसम्भवे किमिह भागलक्षणयेत्यत आह—अत्र 'गङ्गायां घोषः' इति—अर्थात् मुख्यार्थबाधे वाच्यार्थमशेषतः परित्यज्य

तत्सम्बन्धिन्यर्थान्तरे वृत्तिर्जहल्लक्षणा' इति तल्लक्षणम्; सा च तत्रैव भवति यत्र मुख्यार्थबाधः। यथा 'गङ्गायां घोष' इत्यत्र गङ्गाशब्दस्य प्रवाहरूपोऽर्थः घोषस्य चाभीरपल्लीरूपोऽर्थः। अनयोराधाराधेयभावो न सम्भवति, प्रवाहे घोषवसनस्य सर्वथाऽसम्भवादिति मुख्यार्थबाधः। अतः गङ्गाशब्दः प्रवाहरूपमर्थमशेषतः परित्यजंस्तत्सम्बन्धितीररूपार्थान्तरं लक्षयति इति 'गङ्गातीरे घोष' इत्यर्थोपपत्तिरतस्तत्र जहल्लक्षणा युक्ता। 'तत्त्वमसी'त्यत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य न सर्वथा विरोधोऽपि तु परोक्षापरोक्षत्वप्रतिपादकत्वरूपभागमात्रे विरोधश्चैतन्यैकत्वांशे चाविरोध इति तच्छब्दे त्वंशब्दे वाऽशेषतो मुख्यार्थबाधासम्भवात्परोक्षत्वापरोक्षत्वप्रतिपादकत्वरूपविरोधांशपरित्यागेऽपि चैतन्यैकत्वरूपाविरुद्धांशस्य तादवस्थ्याज्जहल्लक्षणया चैतन्यैकत्वबोधनासम्भवाद्भागलक्षणैव युक्ता।

ननु यथा 'गङ्गायां घोषः' इत्यत्र गङ्गापदं प्रवाहरूपं स्वार्थं परित्यज्य तत्सम्बन्धितीररूपपदार्थं लक्षणयाबोधयति तथैव 'तत्त्वमसीति' वाक्ये तत्पदं परोक्षत्वादिविशिष्टरूपं स्वार्थं परित्यज्य जीवचैतन्यं लक्षणया बोधयतु, एवमेव त्वंपदमपि किञ्चिज्ज्ञत्वादिविशिष्टरूपं स्वार्थं परित्यज्येश्वरचैतन्यं लक्षणया बोधयत्विति जहल्लक्षणायाः सर्वथा सम्भव इति चेन्न, श्रुतस्य मुख्यार्थबाधे सति तत्सम्बन्धिन्यश्रुतपदार्थे एव लक्षणायाः सर्वजनसम्मतत्वाद् 'गङ्गायां घोषः' इत्यत्र च गङ्गाघोषयोराधाराधेयभावसम्बन्धविरोधे (मुख्यार्थबाधे) तीरपदाश्रवणेन च तदर्थाप्रतीति श्रुतेन गङ्गापदेन जहल्लक्षणया तत्सम्बन्ध्यश्रुततीरपदार्थस्य प्रतीतिः। 'तत्त्वमसी'त्यत्र तु तत्पदं त्वंपदञ्चोभयं श्रूयमाणमिति ताभ्यां मुख्यतयैव सर्वज्ञत्वाल्पज्ञत्वादिविशिष्टरूपतदर्थप्रतीतौ मुख्यार्थबाधासम्भवाल्लक्षणया तत्पदेन त्वंपदार्थस्य त्वंपदेन च तत्पदार्थस्य वा प्रतीतेरपेक्षाभावाज्जहल्लक्षणाऽसम्भूतेः ॥ २५ ॥

['तत्त्वमसि' यह वाक्य जहदजहल्लक्षणा के द्वारा अखण्डचैतन्य का बोधक है, यह बात पहले कही गई है, अतः यहाँ पर जहल्लक्षणा और अजहल्लक्षणा का क्रमशः निराकरण करके अन्त में जहदजहल्लक्षणा का पक्ष स्थापित किया जाता है।]

(१) जहल्लक्षणा का निराकरण—जहाँ पर पद अपने सम्पूर्ण अर्थ को छोड़ कर अपने से सम्बद्ध किसी दूसरे अर्थ को सूचित करने लगता है, वहाँ जहल्लक्षणा होती है। 'गङ्गायां घोषः' यहाँ पर गंगा शब्द का प्रवाह रूप अर्थ

है, किन्तु उसमें घोष की स्थिति उपपन्न नहीं हो सकती। अतः गंगा शब्द अपने मुख्य अर्थ को सर्वथा त्याग कर सामीप्य सम्बन्ध से तीर अर्थ का बोधक हो जाता है। इस प्रकार 'गङ्गायां घोषः' यहाँ पर 'गङ्गायास्तीरे घोषः' यह अर्थ प्रकट करने के लिए जहल्लक्षणा मानना ठीक हैं, क्योंकि गङ्गा में घोष होना रूप जो वाक्यार्थ है, वह सर्वथा विरुद्ध है। किन्तु यदि यह कहा जाय कि तत्पदवाच्य परोक्षत्वादिविशिष्टसर्वज्ञ चैतन्य, त्वंपदवाच्य अल्पज्ञ चैतन्य नहीं हो सकता और न अपरोक्षत्वादिविशिष्ट जीव चैतन्य ही हो सकता है, अतः 'गङ्गायां घोषः' की तरह यहाँ भी वाच्यार्थ अनुपपन्न है, इसलिए उसी तरह यहाँ भी तत्पद की त्वंपद में या त्वंपद की तत्पद में लक्षणा मान ली जाय जिससे कि दोनों पद अखण्डैकचैतन्य रूप अर्थ के बोधक हो जायें तो यह बात ठीक नहीं हो सकती, क्योंकि जहल्लक्षणा वहीं पर होती है, जहाँ शब्द अपने मुख्य अर्थ को सर्वथा छोड़ देता है। यहाँ पर तत्पद या त्वंपद अपने मुख्य अर्थ (चैतन्य) का सर्वथा परित्याग नहीं कर सकते, क्योंकि उस अंश में कोई विरोध नहीं प्रत्युत परोक्षत्वापरोक्षत्वादि रूप एक भाग ही में विरोध है और उस विरुद्ध वाक्यार्थ के साथ चैतन्यरूप अविरुद्ध वाक्यार्थ को भी त्याग कर लक्षणा मानी जाय, ऐसा समुचित नहीं। इसलिये 'तत्त्वमसि' यह वाक्य जहल्लक्षणा के द्वारा अखण्ड अर्थ (जीवब्रह्मैक्य) का प्रतिपादन नहीं कर सकता।

यदि यह कहा जाय कि जिस प्रकार गङ्गा पद अपने अर्थ का परित्याग करके तीर पद के अर्थ को लक्षित करता है, उसी प्रकार तत्पद अपने परोक्षत्वादिविशिष्ट चैतन्यरूप अर्थ को छोड़कर जीव चैतन्य का लक्षणा द्वारा बोध करे अथवा त्वं पद अपने किञ्चिज्ज्ञत्वादिविशिष्ट चैतन्यरूप अर्थ को छोड़कर ईश्वर चैतन्य को लक्षणा द्वारा बोधित करे, अतः जहल्लक्षणा कैसे नहीं हो सकती? तो यह बात ठीक नहीं क्योंकि 'गङ्गायां घोषः' यहाँ पर तीर पद नहीं है अतः उसके अर्थ की प्रतीति न होने के कारण लक्षणा द्वारा काम चलाना पड़ता है, किन्तु यहाँ पर (तत्त्वमसि) तो तद् पद और त्वं पद दोनों ही वर्तमान हैं, अतः उनके द्वारा ही उनके अर्थ की भी प्रतीति हो रही है। इसलिए लक्षणा द्वारा एक पद से दूसरे पद के अर्थ के बोध कराने की कोई आवश्यकता नहीं ॥ २५ ॥

अत्र 'शोणो धावति' इति वाक्यवदजहल्लक्षणापि न सम्भवति। तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया

तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति । अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासम्भवादजहल्लक्षणा न सम्भवत्येव । न च तत्पदं त्वम्पदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वपदार्थं तत्पदार्थं वा लक्षयत्यतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम् । एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च ॥ २६ ॥

(२) अजहल्लक्षणानिराकृतिः—ननु 'शोणो धावती'त्यत्रेव 'तत्त्वमसी'-त्यत्राप्यजहल्लक्षणयैवाखण्डार्थप्रतीतिः स्यादिति चेन्न, वाच्यार्थापरित्यागेन तत्सम्बन्धिनिवृत्तिरजहल्लक्षणेति तल्लक्षणेन 'शोणो धावती'त्यत्र शोणगुणस्य धावनासम्भवान्मुख्यार्थबाधे सति श्रूयमाणशोणपदस्य शोणगुणरूपस्वरूपस्ववाच्यार्थापरित्यागेन तदाश्रयाश्वादौ लक्षणया मुख्यार्थविरोधो वार्यते । 'तत्त्वमसी'त्यत्र तु परोक्षापरोक्षत्वादिविशिष्टचैतन्यैकत्वरूपमुख्यवाक्यार्थस्य विरुद्धत्वात्तदपरित्यागपूर्वकं परोक्षत्वादिविशिष्टेश्वरचैतन्यावबोधकतच्छब्देनापरोक्षत्वादिविशिष्टजीवचैतन्यस्य अपरोक्षत्वादिविशिष्टजीवचैतन्यावबोधकत्वंशब्देन परोक्षत्वादिविशिष्टेश्वरचैतन्यस्य वा लक्षितत्वेऽपि परोक्षत्वापरोक्षत्वादिरूपविरोधस्य तादवस्थ्यादजहल्लक्षणानुपयुक्तेः ।

ननु तत्त्वं पदयोः परोक्षत्वापरोक्षत्वद्यंशे विरोधश्चैतन्यांशे चोभयोरविरोध इत्यविरुद्धचैतन्यांशसहितं किन्तु परित्यक्तपरोक्षत्वादिधर्मरूपविरुद्धांश तत्पदमपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टं जीवचैतन्यं लक्षयतु, एवमेवोभयसामान्यचैतन्यांशसहितं परित्यक्तापरोक्षत्वादिधर्मरूपविरुद्धांशञ्च त्वंपदं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं वा लक्षयत्विति किं भागलक्षणयेति चेन्न, एकेनैव तत्पदेन परित्यक्तस्य विरुद्धांशपरोक्षत्वादिरूपार्थस्य चैतन्यरूपान्यतरपदार्थस्य च बोधनायोभयलक्षणाया असम्भवात् । अतः 'शोणो धावती'त्यत्र यथा शोणशब्दः स्वार्थबोधनपूर्वकं लक्षणया नीलपीताद्यर्थावबोधनासमर्थस्तथैवात्र तत्त्वं—पदयोरन्यतरल्लक्षणया स्वार्थपरार्थोभयावबोधनासमर्थम् । किञ्च; इह यदा तत्पदं त्वं—पदञ्चोभयं श्रूयमाणं तदा ताभ्यामभिधयैव तदर्थप्रतीतौ लक्षणयाऽन्यतरपदेनान्यतरार्थस्य प्रतीत्यपेक्षाभावं इति यथापूर्वमेव गरीयः ॥२६॥

(२) अजहल्लक्षणा का निराकरण—'तत्त्वमसि' इस वाक्य में 'शोणो धावति' इस वाक्य की तरह अजहल्लक्षणा मान कर भी अखण्ड अर्थ की

प्रतीति नहीं करायी जा सकती, क्योंकि 'शोणो धावति' का अर्थ है—लाल दौड़ता है, किन्तु लाल यह गुण है, अतः उसका दौड़ना सम्भव नहीं, इसलिए मुख्यार्थ में विरोध होने के कारण तात्पर्य की उपपत्ति के लिए शोण-शब्द की शोणगुणविशिष्ट अश्वादि में लक्षणा कर ली जाती है, तब शोण शब्द अपने 'लाल' रूप अर्थ को लिए हुए ही अजहल्लक्षणा द्वारा शोणगुणविशिष्ट अश्वादि का बोधक होता है। इस प्रकार पूर्वोक्त विरोध नहीं रह जाता। किन्तु 'तत्त्वमसि' इस वाक्य में यह लक्षणा नहीं मानी जा सकती, क्योंकि तत् पद का अर्थ है परोक्षत्वादिविशिष्ट चैतन्य और त्वं पद का अर्थ है अपरोक्षत्वादि-विशिष्ट चैतन्य। ये दोनों चैतन्यांश में एकत्व के प्रतिपादक होते हुए भी परोक्षत्वापरोक्षत्व रूप अर्थ में परस्पर विरुद्ध है। इसलिए यदि अजहल्लक्षणा मान कर परोक्षत्वापरोक्षत्वादिविशिष्ट तत् और त्वं पदों के द्वारा केवल चैतन्यांशैकत्व की कल्पना की भी जाय तो परोक्षत्वापरोक्षत्वादिविशिष्ट रूप भेद के बने ही रहने के कारण अभेद प्रतीति नहीं हो सकती और यदि अभेद प्रतीति न हुई तो लक्षणा मानने से कोई लाभ न हुआ। अत; यहाँ अज-हल्लक्षणा नहीं मानी जा सकती।

यदि यह कहे कि तद्-पद जो है, वह त्वं-पद से विरुद्ध अपना जो परोक्ष-त्वादि धर्म है, उसे छोड़ कर अविरुद्ध अर्थात् उभयसामान्य जो चैतन्यांश है, उसको न छोड़ता हुआ त्वं-पद का जो अर्थ है कि किञ्चिज्ज्ञत्वादिविशिष्ट जीव चैतन्य उसको लक्षणा के द्वारा बोधित करा सकता है और इसी प्रकार त्वं पद जो है, यह तद्–पद से विरुद्ध अपना जो अपरोक्षत्वादि धर्म है, उसे छोड़ कर विरुद्ध अर्थात् उभय सामान्य जो चैतन्यांश है, उसको न छोड़ता हुआ तद्-पद का जो अर्थ है, सर्वज्ञत्वादिविशिष्ट ईश्वर चैतन्य–उसे लक्षणा के द्वारा बोधित करा सकता है, इसलिए यहाँ भागलक्षणा (जहदजहल्लक्षणा) स्वीकार करने की आवश्यकता नहीं, तो यह ठीक नहीं; क्योंकि एक ही तद्-पद या त्वं-पद परित्यक्त किए हुए अपने परोक्षत्वापरोक्षत्व रूप अर्थ को भी लक्षणा से सूचित करे और दूसरे पद के अर्थ को भी लक्षणा के द्वारा बोधित करे ऐसी उभय लक्षणा नहीं हो सकती (शोणो धावति) यहाँ शोण-शब्द अपने 'लाल' अर्थ को भी बतलावे और लक्षणया काले या नीले आदि दूसरे गुणों को भी द्योतित करे, ऐसा कभी नहीं हो सकता। इसके अतिरिक्त जब तद् और त्वं दोनों पद वर्तमान है तो उन्हीं से अपने-अपने अर्थों की स्वतः प्रतीति

हो जायगी—लक्षणा द्वारा दूसरे पद से दूसरे पद के अर्थ की प्रतीति कराने की कोई आवश्यकता भी नहीं ॥ २५ ॥

तस्माद्यथा 'सोऽयं देवदत्त' इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्ट-देवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा 'तत्त्वमसी'ति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्ध-परोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति ॥ २७ ॥

(३) भागलक्षणा-स्थापनम्—इत्थञ्च 'तत्त्वमसी'ति वाक्ये भागलक्षण-मेवाखण्डार्थप्रतीतिः। तल्लक्षणन्तु वाच्यार्थैकदेशपरित्यागेनैकदेशवृत्तित्वम्—यत्र शब्द आंशिकरूपेण स्वार्थं परित्यज्यांशिकार्थमेवावगमयति तत्र भागलक्षणा (जहदजहल्लक्षणा) भवतीति भावः। यथा 'सोऽयं देवदत्त' इति वाक्ये तत्कालतद्देशसम्बन्धविशिष्टैतत्कालैतद्देशविशिष्टरूपार्थयोः सोऽयं—शब्दयो-र्देशकालविरोधेऽपि देवदत्तपिण्डरूपैकार्थावबोधनाय जहदजहल्लक्षणा स्वीक्रियते तथैव 'तत्त्वमसीति वाक्येऽपि विरुद्धपरोक्षत्वापरोक्षत्वाद्यंशं जहत्, अविरुद्ध-चैतन्यांशं चाजहत्तत्त्वमितिपदद्वयमखण्डचैतन्यमात्रं लक्षयतीति सर्वमन-वद्यम् ॥ २७ ॥

[पूर्वोक्तप्रकारेणाधिकारिणस्तत्त्वं वाच्यब्रह्मजीवयोस्तादात्म्यज्ञाने जाते सति त्वमर्थस्याब्रह्मत्वं तदर्थस्य च पारोक्ष्यं व्यावर्तते; पूर्णानन्दस्वरूपेण प्रत्य-ग्बोधश्चावतिष्ठते। यथा चोक्तम्—

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत्।
अब्रह्मत्वं त्वमर्थस्य व्यावर्त्येत तदैव हि ॥ इत्यादि]

(३) जहदजहल्लक्षणा की स्थापना—इसलिए 'तत्त्वमसि' इस वाक्य में तीसरे प्रकार की लक्षणा (जहदजहल्लक्षणा या भागलक्षणा) से ही अखण्ड अर्थ का बोध होता है। इस लक्षणा में शब्द अपने अर्थ के कुछ अंश को छोड़-कर कुछ ही अंश का बोधक रह जाता है 'सोऽयं देवदत्तः' इस वाक्य में सः (तत्) शब्द का अर्थ है तत्कालविशिष्ट देवदत्त और अयम् शब्द (इदम्) का अर्थ है एतत्कालविशिष्ट देवदत्त यहाँ देवदत्तांश में कोई विरोध नहीं प्रत्युत तत्कालीन और एतत्कालीन भाग में कालिक विरोध है, अतः यहाँ पर विरुद्धांश को छोड़कर अविरुद्ध देवदत्तपिण्डमात्र का बोध कराने के लिए जहदजहल्लक्षणा मानी जाती है। उसी प्रकार 'तत्त्वमसि' इस वाक्य में

तत्-पद का अर्थ है परोक्षत्वादिविशिष्ट चैतन्य. (ब्रह्म) और त्वं पद का अर्थ है अपरोक्षत्वादिविशिष्ट चैतन्य (जीव) यहां चैतन्यांश में कोई विरोध नहीं किन्तु परोक्षत्व तथा अपरोक्षत्व विशिष्ट अंशों में परस्पर विरोध है। इसलिए इन विरुद्धांशों को त्यागकर (अजहत्) तत् और त्वम् पद अविरुद्ध अखण्ड चैतन्यमात्र को लक्षित करते हैं ॥ २७ ॥

विशेष—

जब अधिकारी को पूर्वोक्त प्रकार से तत् और त्वम् अर्थात् ब्रह्म और जीव जगत् का तादात्म्य ज्ञान हो जाता है तो निम्नलिखित बात होती है—

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्त्येत तदैव हि ॥ १ ॥
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ २ ॥
प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः ?
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ३ ॥

पञ्चदशी में 'तत्त्वमसि' इस महावाक्य का अर्थ निम्नलिखित रूप से प्रदर्शित किया गया है :—

एकमेवाद्वितीयं सन्नामरूपविवर्जितम् ।
सृष्टे पुराऽधुनाऽप्यस्य तादृक्त्वं तदितीर्यते ॥ १ ॥
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वम्-पदेरितम् ।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् ॥ २ ॥

अनुभववाक्यार्थः

अथाधुनाऽहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते। एवमाचार्येणाध्यारोपापवादपुरस्सरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति। सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परब्रह्मविषयीकृत्य तद्गत-ज्ञानमेव बाधते। तदा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति। तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति तथा

स्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत्त्वोपाधिभूताखण्डचित्तवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति ॥

[यहाँ तक अखण्ड चैतन्य के प्रतिपादक 'तत्त्वमसि' इस उपदेश महावाक्य की विस्तृत व्याख्या की गई। इस प्रकार के उपदेश से जिज्ञासु को जो 'अहं ब्रह्मास्मि' यह अनुभव होता है, उस वाक्यार्थ की विस्तृत विवेचना अब यहाँ की जायगी।]

इत्थमाचार्यो यदा अध्यारोपापवादन्यायेन तत्त्वमसीत्येतद्घटकतत्त्वंपदार्थौ सम्यगवबोध्याधिकारिणा तत्त्वमसीति वाक्येनाखण्डार्थमवगमयति तदा तदधिकारिणः 'अहं प्रत्यगात्मा परब्रह्म अस्मि' इति चित्तवृत्तिरुदेति। गुरुमुखश्रुततत्त्वमसीतिवाक्यार्थस्याध्यारोपापवादपुरस्सरं सम्यगवबोधानन्तरमधिकारी देहेन्द्रियादिसकलदृश्यविलक्षणप्रत्यगात्मनः शुद्धेन, चैतन्येन (परमात्मना) सहैकत्वमवगत्याहं ब्रह्मास्मीति वाक्यार्थमनुस्मरन् स्वात्मानन्दमनुभवतीति भावः।

ननु चित्तवृत्तिर्जडेति दीपप्रभाभास्करमण्डलमिव शुद्धप्रकाशमात्मानं व्याप्तुमसमर्थेति तं विषयीकृत्य तदुदयासम्भव इत्यत आह—सा तु इति। सा चित्तवृत्तिर्न शुद्धं ब्रह्म स्वविषयं करोति प्रत्युताज्ञानविशिष्टप्रत्यगभिन्नं परब्रह्म विषयीकुर्वाणा चैतन्यप्रतिबिम्बेन च सहिता प्रत्यक्चैतन्यगतमखिलमज्ञानं विनाशयतीति तदज्ञानावरणविनाशानन्तरमेवाहं नित्यशुद्ध-बुद्धस्वरूपं ब्रह्मेत्यनुभवस्तस्य जायते।

नन्वेवमधिकारिणस्तत्त्वमसीत्यादि वाक्यश्रवणानन्तरं तत्तात्त्विकज्ञानेनाखण्डचैतन्यवृत्त्युदयनिबन्धने प्रत्यक्चैतन्यगताज्ञानविनाशेऽप्यखिलचराचरप्रपञ्चरूपस्य तदज्ञानकार्यस्य पूर्ववदेव प्रत्यक्षमवभासमानत्वात्कथमेवाद्वितीयमित्यद्वैतसिद्धिरित्यत आह—तदेति। कारणे नष्टे कार्यमपि नश्यतीति पटकारणतन्तुदाहे पटरूपकार्यदाहवदखिलप्रपञ्चकारणाज्ञाननाशे तत्कार्यस्याखिलप्रपञ्चस्यापि विनाशसम्भवात्। नन्वेवं कारणीभूताज्ञानविनाशानन्तरं तत्कार्यप्रपञ्चविनाशेऽपि अखण्डाकाराकारितवृत्तेस्सद्भावात्तदपि नाद्वैतसिद्धिरित्यत आह—तदन्तर्भूतेति। अखण्डाकाराकारितवृत्तेरपि अज्ञानतत्प्रपञ्चान्तर्गततया कारणभूताज्ञानविनाशे तत्कार्यरूपवृत्तिप्रपञ्चयोरुभयोरपि विनाशसम्भवात्। नन्वेवमज्ञानप्रपञ्चचित्तवृत्तीनां नाशेऽपि वृत्तिप्रतिबिम्बितचैतन्याभासस्य वर्तमानत्वा-

न्नाद्वैतसिद्धिरित्यत आह—तत्रेति । दर्पणे प्रतिबिम्बितमुखस्य दर्पणाभावे पार्थक्येनावभासनासम्भवादिव चित्तवृत्तौ प्रतिबिम्बितस्य चैतन्यस्य चित्तवृत्त्यभावे पृथक्प्रतीतेरसम्भवात् इति भावः । इत्थञ्च दीपप्रभा प्रभाकरप्रभां प्रभासयितुं यथाऽसमर्था सती तथाऽभिभूयते तथैव प्रतिबिम्बितचैतन्यमपि वृत्तिविनाशानन्तरं पृथङ् न प्रतीयते अपि तु स्वयं प्रकाशमानप्रत्यगभिन्नपरब्रह्मणोऽवभासनासमर्थतया तेनाभिभूतं सत्स्वोपाधिभूतचित्तवृत्तिविनाशाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत्प्रत्यगभिन्नमात्रमवतिष्ठते ॥ २८ ॥

जब गुरु अध्यारोपापवादन्याय द्वारा जिज्ञासु को तत्त्वमसि के तत् और त्वम् पदार्थों को भली-भाँति समझा कर अखण्ड अर्थ का बोध करा देते हैं तो अधिकारी के हृदय में यह अखण्डाकाराकारित चित्तवृत्ति उदय होती है कि मैं ही नित्य शुद्ध बुद्ध आदि स्वरूप ब्रह्म हूँ । अब यह सन्देह होता है कि चित्तवृत्ति तो जड़ है, अतः जिस प्रकार दीपक का प्रकाश सूर्यमण्डल में नहीं व्याप्त हो सकता, उसी प्रकार जड़ चित्तवृत्ति भी स्वयंप्रकाश एवं नित्य शुद्ध बुद्ध आत्मा को अपना विषय बनाकर उदय नहीं हो सकती, इसका समाधान मूल में 'सा तु' इत्यादि के द्वारा किया गया है, अर्थात् वह चित्तवृत्ति शुद्ध ब्रह्म को अपना विषय नहीं बनाती, प्रत्युत वह अज्ञान-विशिष्ट प्रत्यगभिन्न विषयिणी होती है । जब उसमें चैतन्य का प्रतिबिम्ब पड़ता है तब वह प्रत्यक् चैतन्यगत अज्ञानावरण को दूर कर देती है । यही (अज्ञानावरण को दूर करना) उसके उदय होने का प्रयोजन है । प्रत्यक् चैतन्यगत परब्रह्म-विषयक अज्ञानावरण के दूर होते ही उसे यह अनुभव होने लगता है कि मैं ही नित्य शुद्ध बुद्ध आदि स्वरूप ब्रह्म हूँ । अब यह सन्देह होता है कि अधिकारी जब 'तत्त्वमसि' इत्यादि वाक्यों को सुनता है तो उसके तात्त्विक ज्ञान से अखण्ड चैतन्य वृत्ति के कारण प्रत्यक् चैतन्यगत अज्ञान भले ही नष्ट हो जाय पर अज्ञान का कार्य जो सकल चराचर प्रपञ्च है, वह तो प्रत्यक्ष भासित होता ही रहेगा, अतः 'एकमेवाद्वितीयम्' ब्रह्म की सिद्धि कैसे हो सकती है ? इस शङ्का के निवारण के लिए उत्तर यह है कि कारण के नष्ट हो जाने पर कार्य का भी नाश हो जाता है, जैसे तन्तुरूप कारण के जल जाने पर पटरूप कार्य का नाश हो जाता है उसी प्रकार यहाँ भी अज्ञान कारण है और चराचर प्रपञ्च कार्य है, इसलिए जब अज्ञानरूपी कारण नष्ट हो जायगा तो उसका कार्य चराचर प्रपञ्च भी नहीं भासित होगा । यदि यह कहें कि प्रपञ्च के नष्ट

होने पर भी अखण्डाकाराकारित वृत्ति तो अवशिष्ट रहेगी ही, अतः फिर भी अद्वैतसिद्धि नहीं हो सकती, तो इसका उत्तर यह है कि वह वृत्ति भी अज्ञान तथा उसके कार्य-प्रपञ्च के अन्तर्गत ही है, अतः कारणीभूत अज्ञान के नष्ट हो जाने पर प्रपञ्च एवं वृत्ति दोनों नष्ट हो जायेंगे। अब यदि यह कहें कि अज्ञान एवं चराचर प्रपञ्च तथा अखण्डाकाराकारित चित्तवृत्ति के नष्ट हो जाने पर भी वृत्तिप्रतिबिम्बित चैतन्याभास तो विद्यमान रहेगा ही, अतः तब भी अद्वैत-सिद्धि नहीं हो सकती तो इस सन्देह का उत्तर यह है कि अखण्डाकार वृत्ति के नष्ट हो जाने पर भी उसमें जो चैतन्य का प्रतिबिम्ब पड़ रहा था, वह अलग नहीं प्रतीत हो सकता। जैसे दर्पण में प्रतिबिम्ब मुख का पड़ता है, पर यदि दर्पण न रहे तो केवल बिम्ब, अर्थात् मुखमात्र भासित होगा; क्योंकि उसका प्रतिबिम्ब अलग नहीं प्रतिभासित हो सकता। इसी प्रकार वृत्ति में जो चैतन्य का प्रतिबिम्ब पड़ रहा था, वह अब वृत्ति के नष्ट हो जाने पर अलग न भासित होकर बिम्बमात्र शेष रह जायगा। अर्थात् जैसे दीपक की प्रभा सूर्य को अवभासित नहीं कर सकती, अतः उसके आगे क्षीण हो जाती है, उसी प्रकार स्वयंप्रकाश-स्वरूप प्रत्यगभिन्न परब्रह्म को वह चैतन्यप्रतिबिम्ब अवभासित नहीं कर सकता। प्रत्युत जिस अखण्ड चित्तवृत्ति के कारण वह अलग प्रतीत हो रहा था, उसके नष्ट हो जाने पर स्वतः उसी प्रकार बिम्ब मात्र रह जायगा। जिस प्रकार दर्पण में मुख का प्रतिबिम्ब दर्पण के रहते तक दो दिखलाई देता है, किन्तु दर्पण के न होने पर बिम्बमात्र (मुखमात्र) ही शेष रह जाता है। ठीक इसी प्रकार वृत्ति के न होने पर उस चैतन्य के प्रतिबिम्ब का भी बिम्ब-प्रत्यगभिन्न परब्रह्ममात्र ही रह जाता है ॥ २८ ॥

एवञ्च सति 'मनसैवानुद्रष्टव्यं' 'यन्मनसा न मनुते' इत्यनयोः श्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात्। तदुक्तम्—

'फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता' इति ॥
'स्वयंप्रकाशमानत्वान्नाभास उपयुज्यते' इति च ॥

जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति। तथापि अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरस्सरं स्वगतचिदाभासेन जडं घटमपि भासयति। तदुक्तम्—

'बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्' ॥ इति

यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकार-निरसनपुरस्सरं स्वप्रभया तदपि भासयतीति ॥२६॥

इत्थं चैतन्यप्रतिबिम्बितसहिताखण्डाकाराकारितचित्तवृत्त्या प्रत्यक् चैतन्य-गताज्ञानविनाशानन्तरं प्रत्यगभिन्नमात्रमवशिनष्टि । यतो हि स्वयं प्रकाशमान त्वाद्वृत्तिगतचिदाभासेन तस्यावभासनासम्भवः, एवमेतत्स्वीकारे 'मनसैवानु-द्रष्टव्यम्' इत्यादिश्रुतिस्मृतीनां 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिस्मृतिभिः सह विरोधाभावोऽपि सङ्गच्छते । अन्तःकरणवृत्तिप्रतिबिम्बितचिदाभासेना-ज्ञानावच्छिन्नचैतन्यस्याज्ञाननिवृत्तिपूर्वकस्वरूपावबोधतात्पर्येणोक्तानां 'मनसैवेद-मासव्यम्' इत्यादिश्रुतिस्मृतीनां स्वयंप्रकाशशीलपरब्रह्मणोऽन्यावभासनानर्हतया वाङ्मनोबुद्ध्याद्यतीतत्वेन तत्त्वेन तत्तात्पर्येणोक्तानां, 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिस्मृतीनाञ्च पार्थक्येन चारितार्थ्यात् । घटादिपदार्थानवलोक-यितुमक्षिदीपयोरुभयोरावश्यकत्वेऽपि दीपमवलोकयितुमक्षिमात्रस्यावश्यकत्व-मिवाज्ञानावच्छिन्नजीवचैतन्यगतमज्ञानं विनिवर्त्य ब्रह्ममात्रमवशेषयितुम् 'अहं ब्रह्मास्मि' इत्याकारायाश्चित्तवृत्तेस्तद्गतचिदाभासस्य चोभयोरावश्यक-त्वम् । इत्थञ्चाज्ञानावरणापहरणानन्तरमेव ब्रह्मज्ञानं भवतीति तात्पर्येणोक्तानां 'मनसैवानुद्रष्टव्यम्' इत्यादिश्रुतीनां चारितार्थ्यम् । अज्ञानावरणापहरणानन्तरम-वशिष्टस्यावाङ्मनोगोचरस्य फलचैतन्यस्यान्यावभासनानर्हतया तत्तात्पर्येणो-क्तानां 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतीनां चारितार्थ्यमिति भावः । पञ्चदश्यामयं भावो 'ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता' इत्यादिरूपेण स्पष्टीकृतः ।

एतत्तु चैतन्याकाराकारितचित्तवृत्त्यनुरोधेन—अर्थात् 'अहं ब्रह्मास्मि' इत्याकारा वृत्तिरुदीयमाना सती जीवचैतन्यगतमज्ञानावरणमात्रमपसार्य तत्क्षणं स्वयमपि मलिनं जलं निर्मलीकृत्य तस्मिन्नेव जले कतकचूर्णवद्विलीयते । तदन-न्तरं तद्वृत्तिप्रतिबिम्बितपूर्वचैतन्याभासमात्रमवतिष्ठते । स चापि शुद्धचैतन्य-स्यैवान्यानवभासमानानर्हतया तस्मिन्नेव विलीयते ।

जडघटाद्याकाराकारितचित्तवृत्तिरेतस्मात्सर्वथा विभिनत्ति, तद्यथा—यदा घटविषयकज्ञानवानहमित्यज्ञातघटविषयिणी चित्तवृत्तिरुदितिमासादयति तदा सा वृत्तिर्घटावच्छिन्नचैतन्यावरकाज्ञानं विनाशयति तथा स्वस्थचिदाभासेन घट-

मपि प्रकाशयतीत्येतावान् विशेषः पञ्चदश्याः–'बुद्धितत्स्थचिदाभासौ—'घट-मपि कारिकायामप्यैदम्पर्यमुपलभ्यते। (बुद्धिस्तत्प्रतिबिम्बितचिदाभासश्चैतदुभयं घटं व्याप्नोति। तयोर्धिया अर्थात् वृत्त्या घटविषयकमज्ञानं विनश्यति। तत्प्रतिबिम्बितचिदाभासेन च घटः प्रकाशितो भवति)। तात्पर्यञ्चेदं यद् यथा दीपस्तमोनिहितघटाद्यावरणरूपान्धकारमपसारयति स्वप्रकाशेन तदवभासयति च, इत्थमेव घटाद्याकाराकारिता चित्तवृत्तिर्घटादिविषयकचैतन्यज्ञानावरणमप-हरति स्वप्रतिबिम्बचिदाभासेन घटादिकं प्रकाशयति च ॥२९॥

इस प्रकार जब यह मान लिया जाता है कि चैतन्यप्रतिबिम्बसहित अखंडा-काराकारितवृत्ति के द्वारा प्रत्यक्-चैतन्यगत अज्ञान नष्ट होकर प्रत्यगभिन्न पर-ब्रह्ममात्र शेष रह जाता है, क्योंकि स्वयं प्रकाशमान होने के कारण वह वृत्तिगत चिदाभास के द्वारा प्रकाशित ही किया जा सकता तो 'मनसैवानुद्रष्टव्यम्' एवं 'मनसैवेदमाप्तव्यम्', 'दृश्यते त्वग्रयया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः। बुद्ध्या-लोकनसाध्येऽस्मिन् वस्तुन्यस्तमिता यदि। बुद्धियोगमुपाश्रित्य मच्चित्ता सततं भव' इत्यादि श्रुति-स्मृतियों का 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह', 'यन्मनसा न मनुते', 'अनाशिनोऽप्रमेयस्य', इत्यादि श्रुति-स्मृतियों के साथ विरोध नहीं होता, क्योंकि अन्तःकरणवृत्तिबिम्बित चिदाभास के द्वारा अज्ञा-नावच्छिन्न चैतन्य के अज्ञानावरणनिवृत्तिपूर्वक स्वरूपज्ञान के तात्पर्य से कही हुई 'मनसैवेदमाप्तव्यम्' 'दृश्यते त्वग्रयया बुद्ध्या' इत्यादि श्रुति-स्मृतियाँ चरि-तार्थ हो जाती हैं और स्वयंप्रकाशशील परब्रह्म किसी अन्य के द्वारा प्रकाशित नहीं हो सकता, वह मन, वाणी तथा बुद्धि से परे हैं, अतः उसके तात्पर्य से कही हुई 'यतो वाचो निवर्तन्ते' इत्यादि श्रुति-स्मृतियाँ चरितार्थ हो जाती हैं।

अर्थात् जिस तरह घटादि जड़-पदार्थ देखने के लिए आँख और दीपक दोनों की आवश्यकता है, किन्तु दीपक देखने के लिए केवल आँखें पर्याप्त हैं, उसी प्रकार अज्ञानावच्छिन्न जीवचैतन्यगत अज्ञान को हटाकर ब्रह्ममात्र अवशेष रखने के लिये 'अहं ब्रह्मास्मि' यह तदाकाराकारित चित्तवृत्ति तथा तद्गतचिदाभास दोनों की आवश्यकता है। इस प्रकार अज्ञानावरण हट जाने से ब्रह्मज्ञान होने के तात्पर्य से ही 'मनसैवानुद्रष्टव्यम्', 'दृश्यते त्वग्रयया बुद्ध्या', इत्यादि श्रुति-स्मृतियाँ कही गई हैं और अज्ञानावरण हट जाने से जब स्वयं प्रकाशमान चैतन्य (फल चैतन्य) अवशिष्ट रह जाता है तो उसे कोई प्रकाशित नहीं कर सकता, वहाँ किसी की गति नहीं, इस तात्पर्य से कही हुई 'यन्मनसा न मनुते',

'यतो वाचो निवर्तन्ते' इत्यादि श्रुतियाँ संगत हो जाती हैं। यही सब भाव पञ्चदशी में निम्नलिखित रूप से प्रकट किया गया है—

> ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता।
> फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ॥
> चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा।
> न दीपदर्शने, किन्तु चक्षुरेकमपेक्ष्यते ॥
> स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते।
> स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परम्।
> न तु ब्रह्मण्यतिशयं फलं कुर्याद् घटादिवत् ॥

यह तो हुई चैतन्याकाराकारितवृत्ति की बात, अर्थात् 'अहं ब्रह्मास्मि' इस प्रकार की जब अज्ञात ब्रह्मविषयक चित्तवृत्ति उदित होती है तो वह जीव चैतन्यगत अज्ञानावरणमात्र को दूर करती है। उसके दूर होते ही अपने आप ही उसी प्रकार नष्ट हो जाती है, जैसे गँदले पानी को साफ करके कतक[1] चूर्ण अपने आप पानी में विलीन हो जाता है, अथवा अरणिगत अग्नि अरणि से उत्पन्न होकर अरणि के नष्ट हो जाने पर अपने आप ही शान्त हो जाती है, तत्पश्चात् उस वृत्ति में चैतन्य का प्रतिविम्वरूप चैतन्याभास रह जाता है। वह स्वयं प्रकाशमान शुद्ध चैतन्य का ही अंश है, अतः उसे प्रकाशित न कर सकने के कारण उसी में विलीन हो जाता है [स्वयंप्रकाशमानत्वान्नाभास उपयुज्यते]।

किन्तु जडघटाद्याकाराकारितवृत्ति[2] की बात इससे भिन्न है। जब 'अयं घटः' 'अहं घटविषयकज्ञानवान्' इस प्रकार अज्ञातघटविषयकचित्तवृत्ति का उदय होता है तो वह वृत्ति घटावच्छिन्न चैतन्य के आवरण करने वाले घट-विषयक अज्ञान का भी नाश करती है और अपने में वर्तमान चिदाभास के द्वारा घट को भी प्रकाशित करती है। पञ्चदशी की निम्नलिखित कारिका यही बात बतलाती है।

---

१. अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्धि निर्मलम्।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥

२. अन्तःकरण के चक्षुरादि द्वारा घटादि विषय देश में जाकर तत्तदाकार में परिणत होने को वृत्ति कहते हैं।

बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
तत्र ज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥

अर्थात् बुद्धि और बुद्धिप्रतिबिम्बित चिदाभास ये दोनों जाकर घट में व्याप्त होते हैं, उनमें से धी[1] अर्थात् वृत्ति के द्वारा घटविषयक अज्ञान नष्ट हो जाता है और वृत्तिप्रतिबिम्बित चिदाभास के द्वारा घट प्रकाशित होता है। तात्पर्य यह कि जिस प्रकार दीपक अन्धेरे में रक्खे हुए घटादिकों के आवरण-रूप अन्धकार को दूर करता है तथा अपने प्रकाश से उन्हें प्रकाशित भी करता है, उसी प्रकार घटाद्याकाराकारितचित्तवृत्ति घटादिविषयक चैतन्यज्ञाना-वरण को नष्ट करती है और स्वप्रतिबिम्बितचिदाभास के द्वारा घटादिकों को प्रकाशित भी करती है ॥२९॥

एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनननिदिध्यासनसमाध्य-नुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते। श्रवणं नाम षड्विधलिंगैरशेषवेदान्ता-नामद्वितीये वस्तुनि तात्पर्यावधारणम्। लिङ्गानि तूपक्रमोपसंहाराभ्यासा-पूर्वताफलार्थवादोपपत्त्याख्यानि। तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुप-पादनमुपक्रमोपसंहारौ। यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीय-वस्तुनः 'एकमेवाद्वितीयम्' इत्यादौ 'एतदात्म्यमिदं सर्वम्' इत्यन्ते च प्रतिपाद-नम्। प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। यथा तत्रैवाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम्। प्रकरण-प्रतिपाद्यस्याद्वितीयवस्तुनो मानान्तराविषयीकरणम्। फलं तु प्रकरणप्रति-पाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र श्रूयमाणं प्रयोजनम्। यथा तत्र 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' इत्य-द्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः। यथा तत्रैव 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इत्यद्वितीयवस्तुप्रशंसनम्। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरुपपत्तिः। यथा तत्र 'सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयम् मृत्तिकेत्येव सत्यम्' इत्या-दावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते। मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम्। विजातीय-

१. धीशब्देन वृत्तिरूपज्ञानाभिधानात् (वे० प०)

देहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्। समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति। तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम्। तदा मृण्मयगजादिभानेऽपि मृद्भानवद्द्वैतभानेऽप्यद्वैतं वस्तु भासते। तदुक्तम्—

'दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तम्'॥ इति॥

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम्। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयतस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते। ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति। उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावमात्रेणानयोर्भेदोपपत्तेः॥ ३०॥

'एवंपूर्वोदितयाऽन्तःकरणवृत्त्या प्रत्यगभिन्नचैतन्यसाक्षात्कृतौ तत्साधनभूतश्रवणादीनामनुष्ठानस्यापेक्षितत्वात्तेऽपीह प्रदर्श्यन्ते—

श्रवणम्=षड्विधलिङ्गैरशेषवेदान्तवाक्यानामेकस्मिन्नद्वितीयब्रह्मणि तात्पर्यावधारणम्। तत्र लीनमर्थं गमयतीति लिङ्गशब्दव्युत्पत्त्या षड्विधलिङ्गानि ब्रह्मात्मैकत्वावबोधकोपक्रमोपसंहारादीनि तैरित्यर्थः। तानि च—'उपक्रमोपसंहारा'वित्यादिना प्रदर्शितपूर्वाणि। तद्यथा—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥

तत्र—

(१) उपक्रमोपसंहारौ—प्रकरणप्रतिपाद्यविषयमादावुपक्रम्यान्ते तस्यैवोपपादनमुपक्रमोपसंहारौ, यथा छान्दोग्ये षष्ठाध्याये-प्रकरणप्रतिपाद्यमद्वितीयं वस्तु 'एकमेवाद्वितीयम्' इत्येवमादावुपक्रम्य 'एतदात्म्यमिदं सर्वम्' इत्येवंरूपेणान्ते तस्यैवोपपादनम्।

(२) अभ्यासः—स्पष्टोऽर्थः।

(३) अपूर्वता—प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयताऽपूर्वता। यथा छान्दोग्ये एव—'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादिश्रुतिभिर्ब्रह्मण उपनिषन्मात्रप्रामाण्यप्रतिपादनेन तद्विषये प्रमाणान्तराभावप्रतिपादनम्।

(४) फलम्—प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा श्रूयमाणं यत्प्रयोजनं तत्फलम्, यथा 'ब्रह्मविद् ब्रह्मैव भवति, तरति शोकमात्मवित्' इत्यादिरूपेणाद्वितीयवस्तुज्ञानस्य प्रयोजनमद्वितीयवस्तुप्राप्तिरुक्ता ।

(५) अर्थवादः—प्रकरणप्रतिपाद्यस्य वस्तुनः स्थाने स्थाने प्रशंसनमर्थवादः,यथा 'उत तमादेशमप्राक्ष्यः'—इत्यादावद्वितीयवस्तुब्रह्मणः प्रशंसा ।

(६) उपपत्तिः—प्रकरणप्रतिपाद्यविषयं प्रमाणीकर्तुं या युक्तिरुपस्थाप्यते सा उपपत्तिः, यथा जगतो ब्रह्मविवर्तसाधनाय 'यथा सौम्येकेन'—इत्यादिश्रुतिरुपपत्तिः, अर्थात् यथा एकेनैव मृत्पिण्डेन निर्मितं घटशरावादिवस्तु विकारानुकूलनाममात्रेण भिन्नमपि मृद्रूपमेवेति सत्यम् एवमेवैतत्सकलं नामरूपात्मकं जगद् ब्रह्मणो विवर्तो नान्यदिति तद्विवर्तस्य प्रपञ्चस्य विकारनामधेययोर्वाचारम्भणमात्रत्वात्तन्मात्रमेव सत्यमिति युक्तिः ।

मननम्—षड्विधलिङ्गतात्पर्यावबोधपूर्वक-वेदान्तानुकूल-युक्तिभिरद्वितीयवस्तुनो (ब्रह्मणः) निरन्तरमनुचिन्तनम् ।

निदिध्यासनम्—देहादिबुद्धिपर्यन्तविभिन्नजडपदार्थेषु तद्विभिन्नतानिराकरणपूर्वकं सर्वत्रैकाद्वितीयब्रह्मैक्यप्रत्ययप्रवाहीकरणम् ।

समाधि—ज्ञेयरूपे चित्तस्य निश्चलावस्थितिः समाधिः । स द्विविधः—

(१) सविकल्पकः (२) निर्विकल्पकश्च । तत्र—

(१) सविकल्पकः—ज्ञातृ-ज्ञान-ज्ञेयत्रिपुटीभेदभानपूर्वकमद्वितीयवस्तुन्यहं ब्रह्मास्मीति तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् ।

ननु सकलभेदनिराकरणपूर्वकमद्वैतवस्तुमात्रभानार्थमेवोक्तसमाध्योः प्रवर्तनमिति तदवस्थायामपि ज्ञात्रादिभेदभानेऽद्वैतवस्तुसिद्ध्यभावस्समाधेरनुपयुक्तिश्चेत्यत आह तदेति । तदा अर्थात् सविकल्पकसमाध्यनुभवकाले मृण्मयगजादिभानेऽपि मृद्भानवद् ज्ञात्रादिभेदभानस्य वाचारम्भणमात्रत्वादद्वैतमेव वस्तु भासते । एतदेव 'दृशिस्वरूपमि' त्यादिना स्पष्टीकृतम्—

'यत् साक्षिस्वरूपम्' यच्चाकाशवत्सर्वत्र व्याप्तम्, एवं सर्वथा निर्लिप्तम्' यच्च सर्वदा एकरूपेणैवावभासमानम्—न चन्द्रादिप्रकाशवत्कदाचित्क्षीणप्रकाशं कदाचिच्चाधिकप्रकाशम्, यच्च न कदापि जायते; यच्चाक्षरम्, अविनश्वरम् एवमलेपकम् अविद्यादिदोषरहितम्, यच्च सर्वगतम्, सर्वत्र वर्तमानम् एवं सजातीयविजातीयभेदशून्यम्, यच्च सर्वथा कार्यकारणोपाधिनिर्मुक्तम् एवं निरतिशयानन्दस्वरूपं यत्परं ब्रह्म (ॐ) तदहमिति भावः । अत्र यथा परमा-

त्मनो भिन्नभिन्नोपाधीनां निर्देशेऽपि वस्तुगत्या सर्वोपाधयः एकस्यैव परब्रह्मणो विभिन्ननामानीति तदेकत्वं न विरुध्यते तथैव सविकल्पकसमाधौ ज्ञात्रादिभेदभानेऽपि तत्सर्वमद्वैतं ब्रह्मैवेति भिन्नतायामप्येकताया एवानुभवेऽद्वैतस्य भानं न विरुध्यते ।

निर्विकल्पकसमाधिः—अत्र ज्ञातृ-ज्ञान-ज्ञेयभेदभावभानाभाव इत्यद्वितीयवस्तुनि तदाकाराकारितचित्तवृत्तेरतितरामेकीभावेनावस्थानम् । अर्थात् चिराभ्यासवशादस्मिन् समाधौ संस्कारा लुम्पन्तीति ज्ञातृज्ञानज्ञेयभेदभावलुप्त्या यथा जलाकाराकारितलवणस्य न पृथगवभासोऽपि तु जलमात्रस्यैवावभासस्तथैवास्मिन् समाधावद्वितीयवस्त्वाकाराकारितचित्तवृत्तिरपि न पृथगवभासतेऽपि त्वद्वितीयवस्तुमात्रमेवावभासते । ननु सुषुप्तावपि वृत्त्यभानाद्दिदानीं समाधावपि तथात्वप्रतिपादनादुभयोरेकीभावः स्यादिति चेन्न, समाधि–सुषुप्त्योरुभयत्र वृत्त्यभाने समानेऽपि समाधौ जलाकाराकारितलवणमिवाद्वितीयवस्तुन्यतितरामेकीभावेनानवभासमानवृत्तेः सद्भावात्सुषुप्तौ च सर्वथा तदभावाद्भेदोपपत्तेः ॥३०॥

इस प्रकार के स्वस्वरूप चैतन्य के साक्षात्कार होने तक श्रवण, मनन, निदिध्यासन, समाधि और अनुष्ठान इनका करना अत्यन्त अपेक्षित है । इसलिए अब उनको प्रदर्शित करते हैं :—

श्रवण—छः प्रकार के लिङ्गों द्वारा सम्पूर्ण वेदान्तवाक्यों का एक ही अद्वितीय ब्रह्म में तात्पर्य समझना श्रवण कहलाता है ।

छः लिङ्ग—उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

(१) उपक्रम तथा उपसंहार (२) अभ्यास (३) अपूर्वता (४) फल (५) अर्थवाद (६) उपपत्ति ।

(१) उपक्रमोपसंहार—प्रकरणप्रतिपाद्य विषय के आदि और अन्त का भलीभाँति उपपादन करना उपक्रमोपसंहार कहलाता है । जैसे छान्दोग्य उपनिषद् के छठे अध्याय में–अद्वितीय वस्तु प्रतिपाद्य विषय है । उसको प्रतिपादित करते हुए आदि में 'एकमेवाद्वितीयम्' इस प्रकार के उपक्रम द्वारा 'एतदात्म्यमिदं सर्वम्' ऐसा कह कर प्रतिपाद्य विषय का भलीभाँति उपसंहार किया गया है ।

(२) अभ्यास—प्रकरणप्रतिपाद्य वस्तु का बीच में बार-बार प्रतिपादन करना अभ्यास कहलाता है। जैसे छान्दोग्य उपनिषद् में ही अद्वितीय वस्तु के विषय में 'तत्त्वमसि' का बार-बार प्रतिपादन करना अभ्यास है।

(३) अपूर्वता—प्रकरणप्रतिपाद्य अद्वितीय वस्तु के विषय में किसी दूसरे प्रमाण का न होना अपूर्वता है; जैसे छान्दोग्य ही में 'तं त्वौपनिषदं पुरुषं पृच्छामि' इत्यादि श्रुतियों के द्वारा यह बतलाया गया है कि ब्रह्म उपनिषद् मात्र ही से जानने योग्य है, अर्थात् उसके विषय में अन्य कोई प्रमाण नहीं, अतः यह अपूर्वता है।

(४) फल—प्रकरणप्रतिपाद्य जो आत्मज्ञान अथवा उसके अनुष्ठान का जो प्रयोजन वह फल है, जैसे 'ब्रह्मविद् ब्रह्मैव भवति; तरति शोकमात्मविद्; आचार्यवान् पुरुषो वेद तस्य तावदेव चिरम् यावन्न विमोक्ष्येऽथ सम्पत्स्ये' इस प्रकार अद्वितीय वस्तु के ज्ञान का प्रयोजन अद्वितीय वस्तु की प्राप्ति बतलाई गई है।

(५) अर्थवाद—प्रकरणप्रतिपाद्य वस्तु की जगह जगह प्रशंसा को अर्थवाद कहते हैं, जैसे 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति, अमतं मतम्, अविज्ञातम् विज्ञातम्' (तूने उस सकल प्रपञ्चाधिष्ठान ब्रह्म स्वरूप को पूछा, जिसके सुनने से बिना सुना हुआ भी सकलप्रपञ्च सुना हुआ हो जाता है एवं जिस ब्रह्मज्ञान के हो जाने से अज्ञात भी वस्तु ज्ञात हो जाती है, इत्यादि) यहाँ पर अद्वितीय ब्रह्म की प्रशंसा की गयी है।

(६) उपपत्ति—प्रकरणप्रतिपाद्य विषय के प्रमाणित सिद्ध करने में जो युक्ति उपस्थित की जाती है, उसे उपपत्ति कहते हैं, जैसे इस जगत् को ब्रह्म का विवर्त सिद्ध करने के लिए, 'यथा सौम्यैकेन मृत्पिण्डेन'—इत्यादि युक्ति उपपत्ति है अर्थात् जिस प्रकार एक ही मिट्टि के पिण्ड से बनी हुई घट, शराब इत्यादि वस्तुएँ सब मृत्तिका रूप ही हैं, उनके नाममात्र अलग-अलग हैं और यदि नाम रूप को छोड़कर देखा जाय तो सब एक ही मिट्टीरूप हैं, यही सत्य है। इसी प्रकार यह सब नाम-रूपात्मक जगत् ब्रह्म का विवर्त है केवल नाममात्र के लिए पहाड़, नदी, मनुष्य पशु आदि भेद हैं। वास्तव में सब एक ब्रह्म मात्र ही सत्य है और अन्त में वही एकमात्र शेष रह जाता है।

मनन—छः प्रकार के लिङ्गों का तात्पर्य समझ कर वेदान्त की अनुकूल युक्तियों के द्वारा अद्वितीय ब्रह्म का निरन्तर चिन्तन करना मनन कहलाता है।

निदिध्यासन—देह से लेकर बुद्धि पर्यन्त जितने भी भिन्न भिन्न जड़ पदार्थ हैं, उनकी भिन्नत्व-भावना को हटा कर सब में एकमात्र ब्रह्मविषयक विश्वास करना निदिध्यासन है।

समाधि[1]—यह दो प्रकार की होती है (१) सविकल्पक और (२) निर्विकल्पक।

(१) सविकल्पक समाधि—सविकल्पक समाधि की दशा में ज्ञाता, ज्ञान और ज्ञेय इनका भेदज्ञान होते हुए भी 'अहं ब्रह्मास्मि' इस अखण्डाकाराकारित चित्तवृत्ति की स्थिति होती है।

यहाँ पर सन्देह हो सकता है कि समाधि में तो सब भेद दूर होकर अद्वैतमात्र का ही भान होना चाहिए, क्योंकि यदि समाधि दशा में भी ज्ञाता, ज्ञान और ज्ञेय का भेद भासित होता रहा तो समाधि से क्या लाभ ? इस सन्देह का उत्तर यह है कि सविकल्पक समाधि की दशा में ज्ञाता, ज्ञान और ज्ञेय का भेद भासित होते हुए भी अद्वैत वस्तु का उसी प्रकार भान होता है, जैसे मिट्टी के बने हुए हाथी इत्यादि में मिट्टी और हाथी इन दोनों के भासित होते हुए भी हाथी इत्यादि नाम मात्र हैं। एवं स्वर्ण के कटक, कुण्डलादि में कटक-कुण्डलादि नाम मात्र हैं। वास्तविक कारण (मिट्टी) सब में एक ही है। उसी प्रकार ज्ञाता, ज्ञेय एवं ज्ञान का भेद-भान वाचारम्भण मात्र है पर तद्गत अद्वैत का भान वास्तविक है। यही बात 'दृशिस्वरूपम्'—इत्यादि कारिका में स्पष्ट की गयी है, अर्थात् जो साक्षिस्वरूप है, जो आकाश के समान सर्वत्र व्याप्त एवं सर्वथा निर्लिप्त है, जो सर्वदा एक ही रूप भासित होता रहता है (चन्द्रादि के प्रकाश के समान जिसका तेज कभी कम या अधिक नहीं होता है), जिसका कभी जन्म नहीं होता, जो अक्षर है अर्थात् कभी नष्ट नहीं होता, जो अविद्यादि दोषों से रहित है जो सर्वत्र विद्यमान है तथा सजातीय एवं विजातीय भेदशून्य एवं एक है, जो कार्य—कारणात्मक उपाधि से सर्वथा निर्मुक्त है, इस प्रकार का निरतिशयानन्द स्वरूप जो परब्रह्म (ॐ) है, वह मैं ही हूँ।

---

१. ज्ञेय रूप में चित्त की निश्चल स्थिति को समाधि कहते हैं। यह दो प्रकार की होती है—१. सविकल्पक २. निर्विकल्पक। इन्हीं को क्रमशः सम्प्रज्ञात और असम्प्रज्ञात समाधि भी कहते हैं।

यहाँ पर यद्यपि परमात्मा की भिन्न-भिन्न उपाधियों का निर्देश है, पर वे नाममात्र के लिए हैं। वस्तुगत्या सब एक ही परब्रह्म के भिन्न-भिन्न नाम हैं। इसी प्रकार सविकल्पक समाधि में ज्ञाता, ज्ञान, ज्ञेय की भिन्नता का जो भान होता है, वह नाममात्र; वास्तव में ज्ञाता, ज्ञान, ज्ञेय सब अद्वैत ब्रह्म ही हैं। इस प्रकार भिन्नता में भी एकता (अद्वैत) का भान होता है।

(२) निर्विकल्पक समाधि—इस समाधि में ज्ञाता, ज्ञान और ज्ञेय का भेद-भाव नहीं रहता, अपितु अद्वितीय वस्तु में ही तदाकाराकारित चित्तवृत्ति की अतिशय एकता होकर उसी रूप में उसकी स्थिति रहती है, अर्थात् चिराभ्यास के कारण इस समाधि में संस्कार लुप्त हो जाते हैं, ज्ञानादि का भेद-भाव लुप्त हो जाता है; एवं जिस प्रकार जल में लवण परिपूर्ण रूप से घुल जाने के कारण अलग नहीं प्रतीत होता प्रत्युत जल मात्र ही भासित होता है उसी प्रकार अद्वितीय वस्त्वाकारित चित्तवृत्ति का पृथक् अवभास बिलकुल नहीं होता, वरन् अद्वितीय वस्तु मात्र का भान होता है।

यहाँ अब यह सन्देह हो सकता है कि यदि निर्विकल्पक समाधि में वृत्ति का भान नहीं होता तो सुषुप्ति में भी वृति का भान नहीं होता, अतः दोनों (निर्विकल्पक समाधि और सुषुप्ति) एक ही हो जायँगे। इसका समाधान यह है कि यद्यपि समाधि और सुषुप्ति दोनों में वृत्ति का भान नहीं होता, पर समाधि में वृत्ति रहती है और जल में नमक की तरह अद्वैत में उसकी तन्मयता हो जाने के कारण पृथक् भासित नहीं होती, किन्तु सुषुप्ति में वृत्ति रहती ही नहीं। इस प्रकार समाधि और सुषुप्ति में वृत्ति के रहने और न रहने के कारण एकता नहीं हो सकती ॥ ३० ॥

अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः। तत्र 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः'। 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः'। करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः। इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः। अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा। तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम्। समाधिस्तूक्तः सविकल्पक एव ॥ ३१ ॥

मूल एव स्पष्टोऽर्थः ॥ ३१ ॥

इस निर्विकल्पक समाधि के आठ अङ्ग हैं—(१) यम (२) नियम (३) आसन (४) प्राणायाम (५) प्रत्याहार (६) धारणा (७) ध्यान और (८) समाधि ।

(१) यम—अहिंसा, सत्य, अस्तेय (चोरी न करना) ब्रह्मचर्य, अपरिग्रह (दान न लेना) इसको यम कहते हैं ।

(२) नियम—पवित्रता, सन्तोष, तपस्या, स्वाध्याय और ईश्वरप्रणिधान को नियम कहते हैं ।

(३) आसन—कर-चरणादिकों के द्वारा किये जाने वाले पद्म, स्वस्तिक आदि आसन कहलाते हैं ।

(४) प्राणायाम—नासिका द्वारा वायु का उपर खींचना पूरक, उसका अवरोध कुम्भक तथा उसका त्याग रेचक कहलाता है । प्राणवायु के निग्रह के लिए जो ये उपाय हैं, उन्हें प्राणायाम कहते हैं ।

(५) प्रत्याहार—अपने अपने विषयों से इन्द्रियों का हटा लेना प्रत्याहार कहलाता है ।

(६) धारणा—अन्तःकरण का अद्वितीय वस्तु में लगा देना धारणा है ।

(७) ध्यान—अन्तःकरण का रुक-रुक कर अद्वितीय वस्तु की ओर प्रवृत्त करना ध्यान कहलाता है ।

(८) समाधि—सविकल्पक । ज्ञाता और ज्ञानादि के भेदावभासपूर्वक अद्वितीय वस्तु में तदाकाराकारित चित्तवृत्ति की स्थिति को सविकल्पक समाधि कहते हैं ।। ३१ ॥

एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति । लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा । अखण्ड वस्त्वलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः । लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः । अखण्डवस्त्ववलम्बनेनापि चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसास्वादः । समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा ॥ ३२ ॥

अस्य निर्विकल्पकसमाधेर्यमादीन्यष्टावङ्गानि लयादयश्च चत्वारो विघ्ना भवन्ति तत्राङ्गवर्गस्य मूलेनैवागतार्थत्वाद्विघ्नवर्गो व्याख्यायते—

(१) लयः—आलस्यवशाच्चित्तवृत्तिश्शब्दादिबाह्यविषयान् ग्रहीतुमुपेक्षमाणा तिष्ठति किन्त्वेवं कृते सति प्रत्यगात्मस्वरूपमपि नावभासतेऽतः सा

नितरां निद्रिता सञ्जायते । अस्या दशाया नाम लयः । स चाद्वितीयवस्तुप्राप्ति-विघ्नः ।

(२) विक्षेपः—अखण्डवस्त्ववलम्बनायान्तर्मुखीनापि चित्तवृत्तिर्यदा तद-वलम्बनेऽसमर्था भवति तदा पुनर्बाह्यवस्तुग्रहणे प्रवर्तते । एष विक्षेपः ।

(३) कषायः—लयविक्षेपरूपविघ्नाभावेऽप्युद्बुद्धरागादिवासनावशात्स्त-ब्धीभावमापन्नायाश्चित्तवृत्तेरद्वितीयवस्तुनोऽनवलम्बनं कषायः ।

(४) रसास्वादः–अखण्डवस्त्ववलम्बनजन्यानन्दातिरेकाननुभवेऽप्यनिष्ट-बाह्यप्रपञ्चनिवृत्त्या ब्रह्मानन्दभ्रमेण यः सविकल्पकानन्दानुभवः स रसास्वादः । निर्विकल्पकसमाध्यारम्भकालेऽनुभूयमानो यः सविकल्पकानन्दस्तदपरित्यागपूर्वकं पुनस्तस्यैवास्वादनं वा रसास्वादः ॥ ३२ ॥

इस पूर्वोक्त निर्विकल्पक समाधि के चार विघ्न होते हैं—(१) 'लय, (२) विक्षेप, (३) कषाय, (४) रसास्वाद ।

(१) लय—आलस्य के कारण चित्तवृत्ति शब्दादि बाह्य–विषयों का ग्रहण करने में उपेक्षित रहती है, पर उधर प्रत्यगात्मकस्वरूप भी नहीं अवभा-सित होता, अतः चित्तवृत्ति बिलकुल निवृत्त हो जाती है । इसका नाम 'लय' है । यह अद्वितीय वस्तु की प्राप्ति का विघ्न है ।

(२) विक्षेपः—अखण्ड वस्तु का ग्रहण करने के लिये जब चित्तवृत्ति अन्तर्मुखी होती है, किन्तु वह उसे पाती नहीं तो पुनः बाह्य वस्तुओं का ग्रहण करने में प्रवृत्त हो जाती है, इसे 'विक्षेप' कहते हैं ।

(३) कषाय—लय और विक्षेप रूप विघ्नों के न होते हुए भी रागादि वासनावश चित्तवृत्ति के स्तब्ध हो जाने के कारण अखण्ड वस्तु का अनव-लम्बन 'कषाय' कहलाता है ।

(४) रसास्वाद—अखण्ड वस्तु के आनन्दातिरेक की प्राप्ति न होने पर भी अनिष्ट बाह्यप्रपञ्च की निवृत्ति होने के कारण ब्रह्मानन्द के भ्रम से जो सविकल्पकरूप आनन्द का अनुभव होता है, उसे 'रसास्वाद' कहते हैं । अथवा समाधि के प्रारम्भ में जो सविकल्पक आनन्द का आस्वादन है, उसे रसास्वाद कहते हैं ॥ ३२ ॥

अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्र-मवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते । तदुक्तम्—

'लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
स कषायं विजानीयाच्छमप्राप्तं न चालयेत् ।
नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ।। इति
'यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।। इति च ।।३३।।

एतदुक्तलयादिविघ्नचतुष्टयरहितं चित्तं यदा निवातस्थलस्थितदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते सैव तस्य निर्विकल्पकसमाध्यवस्थोच्यते । एतद-वाप्तये गौडपादेन 'लये सम्बोधयेच्चित्तम्'—इत्यादिप्रकारोऽभिहितः । अर्थात् पूर्वोक्तनिद्रालक्षणे लये प्राप्ते तन्निवृत्त्यर्थं चित्तमुद्बोधयेत्—चित्तगतजाड्यापनो-दनपूर्वकं तदुत्साहयेत् । विक्षेपरूपविघ्ने समुपस्थिते च चित्तस्य बाह्यप्रवणतां विषयवैराग्यादिना निगृह्यान्तःप्रवणञ्च तद् कृत्वा धैर्यावलम्बनेन पुनरद्वितीयवस्तुनिष्ठं कुर्यात् । कषायरूपविघ्ने समुपस्थिते जानीयात्—कलुषितं मे चित्तम्, अस्याश्च रागादिवासनाया बाह्यविषयप्रापकत्वेन नानयाऽखण्डवस्तु-प्राप्तिरिति चावधार्य चित्तं प्रत्यक्प्रवणं कुर्यात् । एवं कृते सति यदा चित्तं शमप्राप्तं स्यात्तदा तत् तस्मान्न विचालयेत् । अपि तु तत्रैव स्थिरीकुर्यात् । तस्याञ्च दशायां तावन्मात्रेण न कृतार्थमात्मानं मन्वीत, किन्तु निःसङ्ग अर्था-द्विरहितवैषयिकसुखदुःखादिः सन् प्रज्ञया बुद्धया युक्तो भवेत् । इत्थञ्च लयादि-विघ्नचतुष्टयविरहितचित्तस्यचिन्मात्रावस्थितिर्निर्विकल्पकसमाधिरिति फलितम् । अस्याश्च दशायाश्चित्तस्य निवातस्थलदीपकेन सहोपमितम् । तथा चोक्तम्—'यथा दीप' इत्यादि ।। ३३ ।।

इन पूर्वोक्त लय इत्यादि चारों विघ्नों से रहित चित्त जब निर्वातस्थल में वर्त्तमान दीपक की तरह निश्चल एवं अखण्डचैतन्यमात्र स्थित होता है, तब वही उसकी निर्विकल्पक समाधि अवस्था कहलाती है । इसकी प्राप्ति के लिए गौड-पाद ने 'लये सम्बोधयेच्चितम्'—इत्यादि प्रकार बतलाये हैं । अर्थात् जब निद्रारूपी लय हो तो उसके दूर करने के लिए चित्त को बार-बार उत्साहित करके उसे जागृत करे । जब विक्षेपरूपी विघ्न उपस्थित हो तो चित्त को विषय वैराग्यादि द्वारा शान्त करे और धैर्यावलम्बन द्वारा उसे पुनः अद्वितीय वस्तु में लगावे । जब कषायरूपी विघ्न उपस्थित हो तो यह सोचकर कि यह रागादि वासना बाह्य विषयों की ओर ले जाने वाली है, इसके द्वारा अखण्ड वस्तु की प्राप्ति नहीं हो सकती, अतः इसका परित्याग कर देना चाहिए । इस प्रकार विचार करने से जब चित्त शम को प्राप्त हो जाय; तब उसे वहीं स्थिर

कर दे, फिर उसे वहाँ से विचलित न करे तथा उस दशा में सविकल्पक रस के आनन्दमात्र से अपने आपको कृतार्थ न समझे; किन्तु बुद्धि के द्वारा सविकल्पक आनन्द में अनासक्त रहे। इस प्रकार लय इत्यादि जो चार विघ्न हैं, उनसे रहित चित्त की चिन्मात्रावस्थिति को निर्विकल्पक समाधि कहते हैं। इस दशा के चित्त की उपमा निर्वातस्थल में वर्तमान दीपक से दी गई है ॥ ३३ ॥

जीवन्मुक्तलक्षणम्

अथ जीन्वमुक्तलक्षणमुच्यते। जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' ॥इत्यादि श्रुतेः ॥३४॥

एतौ चोक्तनिर्विकल्पकसमाधी जीवन्मुक्तस्यैव सम्भवत इति तल्लक्षणमधुनोच्यते :—

जीवन्मुक्तलक्षणम्—गुरूपदेशश्रुतिवाक्यस्वानुभवैर्ब्रह्मात्मैक्यं, विज्ञानेनात्मगताखिलाज्ञाने विनष्टे सत्यखण्डब्रह्मसाक्षात्कृतिः। एतस्याञ्च दशायां मूलमज्ञानम्, तत्कार्यरूपसञ्चितकर्मसंशयविपर्ययादयश्चापि विनश्यन्तीति विगताखिलबन्धनस्यात्मनो ब्रह्ममात्रेऽवस्थितिरित्येवंभूतो ब्रह्मनिष्ठ एव जीवन्मुक्तः। जीवतो जनस्य कर्तृत्वभोक्तृत्वसुखदुःखादिधर्माः क्लेशदायकत्वेन बन्धनस्वरूपा एवेति, तेषु विनष्टेषु विमुक्तसकलबन्धनस्य तस्य निष्ठा ब्रह्ममात्रेऽवतिष्ठतेऽत एवंभूतब्रह्मनिष्ठस्य जीवन्मुक्त इति संज्ञा साम्प्रतमेव। मुण्डकोपनिषद्यपि 'भिद्यते हृदयग्रन्थिरि'त्यादिना ब्रह्मसाक्षात्कृतिदशा वर्णिता-तस्मिन्नात्मतत्त्वे साक्षात्कृते सति हृदयग्रन्थिः, बुद्धिस्थिताऽविद्यावासनामयकामनादि विनश्यति; ज्ञेयपदार्थविषयकाखिलसन्देहसन्दोहाभावश्च जायते। एवं विनष्टाखिलसंशयविनिवृत्ताविद्यस्य सर्वकर्माणि विज्ञानोत्पत्तिपूर्वजन्मान्तरकृतान्यप्यद्यावध्यफलोन्मुखानि तथा ज्ञानोत्पत्त्या सह कृतानि एतानि सर्वाणि विनश्यन्ति तस्मिन्नसंसारिणि सर्वज्ञे परावरे—कारणरूपेण परे, कार्यरूपेण चावरे—एवं परावरे 'अयं साक्षादहमेव' इत्थं साक्षात्कृते सति जीवन्नपि पुरुषो मुक्तः सञ्जायते इति भावः ॥ ३४ ॥

[सविकल्पक और निर्विकल्पक समाधियाँ जीवन्मुक्त ही के लिए सम्भव हो सकती हैं, अतः अब जीवन्मुक्त का लक्षण कहते हैं]

गुरु के उपदेश, श्रुतिवाक्य तथा अपने अनुभव से जब आत्मा और ब्रह्म की एकता का ज्ञान हो जाता है तो उस ज्ञान के द्वारा आत्मगत सकल अज्ञान नष्ट हो जाने के कारण अखण्ड ब्रह्म का साक्षात्कार होता है। ऐसी दशा में मूल अज्ञान तथा उनके कार्यरूप संचित कर्म संशय, विपर्यय आदि भी नष्ट हो जाते हैं। अतः सम्पूर्ण बन्धनों से रहित हो जाने के कारण ब्रह्ममात्र में आत्मा की तत्परता रह जाती है। इस प्रकार के ब्रह्मनिष्ठ को ही जीवन्मुक्त कहते हैं, क्योंकि जीते हुए पुरुष को कर्तृत्व, भोक्तृत्व, सुख-दुःखादिरूपी जो चित्त के धर्म हैं, वे सब क्लेशदायक होने के कारण बन्धन स्वरूप ही हैं, पर जब वे नष्ट हो जाते हैं, तो उसकी निष्ठा केवल ब्रह्म में ही रह जाती है। अतः ऐसे ब्रह्मनिष्ठ की जीवन्मुक्त यह संज्ञा ठीक है। मुण्डक उपनिषद् भी 'भिद्यते हृदय-ग्रन्थिः'—इत्यादि रूप से ब्रह्मसाक्षात्कार की दशा का वर्णन करती है, अर्थात् उस आत्मतत्त्व का साक्षात्कार होने पर हृदय की ग्रन्थि (बुद्धि में स्थित अविद्या वासनामय कामनाएँ) टूट जाती हैं तथा लौकिक पुरुषों के ज्ञेय, पदार्थविषयक सम्पूर्ण सन्देह विच्छिन्न हो जाते हैं। जिसके संशय नष्ट हो गये हैं और जिसकी अविद्या निवृत्त हो चुकी है, ऐसे इस पुरुष के सब कर्म (जो विज्ञानोत्पत्ति से पूर्व जन्मान्तर में किये गये थे, किन्तु फलोन्मुख नहीं हुए तथा जो ज्ञानोत्पत्ति के साथ-साथ किये गये हैं, वे सभी कार्य) नष्ट हो जाते हैं। तात्पर्य यह कि उस सर्वज्ञ असंसारी परावर—करणरूप से पर और कार्यरूप से अवर—ऐसे उस परावर के 'यह साक्षात् मैं ही हूँ' इस प्रकार देख लिये जाने पर पुरुष मुक्त हो जाता है ॥ ३४ ॥

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणान्ध्यमान्द्या-पटुत्वादिभाजनेनेन्द्रियग्रामेणाशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति। यथेन्द्रजालमिति ज्ञानवांस्त-दिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। 'स चक्षुरचक्षुरिव सकर्णोऽकर्ण इव' इत्यादिश्रुतेः। उक्तं च—

'सुषुप्तवज्जाग्रति यो न पश्यति, द्वयं च पश्यन्नपि चाद्वयत्वतः।
तथा च कुर्वन्नपि निष्क्रियश्च यः, स आत्मविन्नान्य इतीह निश्चयः' ।३५। इति

नन्वेवंभूतो जीवन्मुक्तो देहेन्द्रियादीन्युपयुनक्ति न वा? उपयुनक्ति चेद्बद्ध-मुक्तयोरभेदः,नोपयुनक्ति चेच्छरीरस्याशुविनाशोऽवश्यं भावीति सन्दिग्धनिवृत्त्यर्थं-

माह—अयमिति। अयं जीवन्मुक्तो जाग्रदवस्थायां मांसासृङ्मलमूत्रादिपात्रेणानेन शरीरेण, अन्धत्वबधिरत्वादिभाजनबाह्येन्द्रियसमूहेन, अशनायापिपासाशोकमोहादिपात्रेणान्तःकरणेन च पूर्ववासनया क्रियमाणानां प्रारब्धकर्मणाञ्च फलान्यवलोकयन्नपि (भुञ्जानोऽपि) तात्त्विकदृष्ट्या तथैव नावलोकयति (न भुङ्क्ते) यथा इन्द्रजालमिति ज्ञानवान् जनः इन्द्रजालमेतदिति जानन्नपि 'परमार्थमेतदिति' बुद्धया न पश्यति—तत्र कर्तृत्वभोक्तृत्वादिबुद्धिं न करोति। यतो हि तस्यां दशायां ज्ञानेन तस्याज्ञानं विनश्यतीति बद्धापेक्षया तस्मिन्नेतावान् विशेषो भवति। किञ्च, यथा बलवता प्रेरितो बाणो वेगक्षयं यावन्न निपतति तथैव प्रवृत्तफलकर्माधीनस्य देहस्याशु विनाशः (सद्यःपातः) न सम्भवति। इत्थञ्च जीवन्मुक्तो देहेन्द्रियादीन्युपयुञ्जन्निवावलोक्यमानोऽपि परमार्थतो न तान्युपयुनक्तीत्यत्र 'सचक्षुरचक्षुरिव', 'तदेजति तन्नैजति' इत्यादि श्रुतिरपि प्रमाणम्। अस्मिन् विषये पूर्वाचार्यसम्मतिं प्रदिदर्शयिषुरुपदेशसाहस्रीकारिकामपि प्रमाणरूपेणोपन्यस्यति ग्रन्थकारः —सुषुप्तवदित्यादि। जाग्रति जाग्रदवस्थायाम् अविद्यावशाद् द्वयं पश्यन्नपि यः अद्वयत्वतः सुषुप्तावस्थायाः अद्वैतभानापेक्षया तद् (द्वयम्) विशेषं न मनुते तथा लोकसंग्रहार्थं कर्माणि कुर्वाणोऽपि तत्र कर्तृत्वाद्यभिमानाभावान्निष्क्रियः, कर्मफलनिर्लिप्तः। एवंभूत एव जनः इह आत्मवित् जीवन्मुक्तो नान्य इति निश्चयः॥ ३५॥

[अब यहाँ यह सन्देह होता है कि इस प्रकार का जीवन्मुक्त देह तथा इन्द्रियादिकों का उपयोग करता है या नहीं। यदि उपयोग करता है तो बद्ध और मुक्त में कोई अन्तर नहीं, यदि उपयोग नहीं करता है तो शरीर का शीघ्र विनाश अवश्यम्भावी है। इस सन्देह के निवारण करने के लिए मूल में 'अयं तु–' इत्यादि लिखते हैं अर्थात्] यह जीवन्मुक्त जाग्रत् अवस्था में होता है तो मांस-रक्त-मलमूत्रादि के पात्र इस शरीर से तथा अन्धत्वादि के भाजन बाह्य इन्द्रिय समूह से और भूख-प्यास-शोक-मोहादि के पात्र अन्तःकरण से पूर्ववासना के कारण किये जाते हुए कर्मों तथा प्रारब्ध कर्मों के फलों को देखता हुआ भी तात्त्विक दृष्टि से उसी प्रकार नहीं देखता, जैसे जादू देखने वाला पुरुष जादूगर की बातों को जादू समझ कर 'यह वास्तविक नहीं' इस प्रकार देखता हुआ भी नहीं देखता [अर्थात् उनमें कर्तृत्व-भोक्तृत्वादि अभिमान नहीं रखता क्योंकि उस दशा में ज्ञान के द्वारा उसका अज्ञान नष्ट हो जाता है, अतः उसमें बद्ध की अपेक्षा यह विशेषता होती है। साथ ही जैसे

किसी बलवान् के द्वारा फेंके हुए बाण में जब तक फेंकने वाले की शक्ति रहती है, तब तक वह नहीं गिरता। उसी प्रकार जब तक कर्म का फल चालू रहता है तब तक उसके शरीर का विनाश भी नहीं होता] इसी बात को 'सचक्षुरचक्षुरिव, सकर्णोऽकर्ण इव, तदेजति तन्नैजति' इत्यादिरूप से श्रुतियाँ भी प्रमाणित करती हैं। 'उपदेशसाहस्री' में जीवन्मुक्त का लक्षण 'सुषुप्तवज्जाग्रति यो न पश्यति' इत्यादि रूप से बतलाया गया है, अर्थात् जाग्रत अवस्था में द्वैतभान के होते हुए भी जो सुषुप्तावस्था के अद्वैतभान की तरह विशेष नहीं समझता तथा कर्मों को करता हुआ जो निष्क्रिय हैं, वही आत्मवेत्ता (जीवन्मुक्त) है, दूसरा नहीं, ऐसा निश्चय है ॥ ३५ ॥

अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्तिवच्छुभवासनामेवानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा। तदुक्तम्—

बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे' ॥ इति।
'ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः' ॥ ३६ ॥ इति ॥

ननु यदि जीवन्मुक्तः कर्म कुर्वन्नप्यात्मानं निष्क्रियं मनुते तदा तस्य पुण्यपापलोपाभावेन तदभिमानवशाद् यथेष्टाचरणप्रसङ्ग, इत्यत आह—अस्येति। जीवन्मुक्तस्यात्मज्ञानात्पूर्वमेव शान्तिसन्तोषादिशुभगुणैरशुभकर्मवासना विनिवार्यते। अतो यथा संसारदशायां स्वभावतयाऽनुकूलाभीष्टयथोपस्थितपदार्थाहारादिषु तस्य प्रवृत्तिर्न विषयादिष्वेवमेव तत्त्वज्ञानानन्तरं तस्य शुभानामेव वासनानामनुवृत्तिर्भवतीति तत्फलस्वरूपशुभकर्मस्वतो न यथेष्टाचरणप्रसङ्गः। यदि च तस्या अपि क उपयोग इत्यनुयोगस्तदा शुभाशुभयोरुभयोरौदासीन्यमिति गृहाण, अशुभकर्मसु तु तस्य न कथमपि प्रवृत्तिरिति जीवन्मुक्तस्य न कथमपि यथेष्टाचरणप्रसङ्गः सम्भवति। तथात्वे च सति मूर्खात्मज्ञानिनोरभेदापत्तिः स्यात्। नैष्कर्म्यसिद्धिरपि 'बुद्धाद्वैतसतत्त्वस्य' इत्यादिकारिकया एतदेव स्पष्टीकरोति। तथा च ब्रह्मविदहमित्यभिमानं त्यक्त्वा आत्मनोऽलुप्तदृष्टत्वमकर्तृत्वञ्च यो वेद स एवात्मज्ञो नान्यः। अयमेव भाव उपदेशसाहस्र्याम्' 'यो वेदालुप्तदृष्टत्वम्' इत्यादिनाऽभिव्यक्तो लभ्यते ॥ ३६ ॥

अब यह सन्देह हो सकता है कि यदि जीवन्मुक्त कर्म करता हुआ भी अपने आपको उसका कर्त्ता नहीं समझता (इसलिए उसे पापपुण्य भी कुछ नहीं होता) तो वह भले-बुरे कोई भी काम अपनी इच्छानुसार कर सकता है।

इसका समाधान करने के लिए कहते हैं कि ज्ञान के होने के पहले ही इस जीवन्मुक्त के शान्त्यादि गुणों से अशुभकामनाएँ नष्ट हो जाती हैं, इस कारण जैसे ज्ञानोत्पत्ति के पूर्व संसारी दशा में वह यथोपस्थित आहारादि से ही सन्तुष्ट होकर विशेष के लिए कोई प्रयत्न नहीं करता, उसी प्रकार तत्वज्ञानानन्तर जीवन्मुक्त दशा में भी शुभवासनाओं की अनुवृत्ति के फलस्वरूप वह शुभकर्मों में ही प्रवृत्त होता है; अशुभ कर्मों में नहीं।

यदि कहें कि जीवन्मुक्त दशा में शुभवासनावृत्ति की भी क्या आवश्यकता है तो इसका उत्तर यह है कि फिर वह शुभ या अशुभ दोनों से उदासीन हो जाता है। सारांश यह कि ऐसी परिस्थिति में यदि जीवन्मुक्त की प्रवृत्ति होगी तो शुभ कर्मों में ही होगी, अन्यथा शुभाशुभ दोनों में उदासीनता हो जायगी पर अशुभकर्मों में प्रवृत्ति न होगी; क्योंकि ऐसा करने से मूर्ख और आत्मज्ञानी में फिर अन्तर ही क्या रह जायेगा। नैष्कर्म्यसिद्धि की 'शुद्धाद्वैतसतत्त्वस्य' इत्यादि कारिका यही बात स्पष्ट करती है। इसलिए मैं आत्मज्ञानी हूँ, इस अभिमान को छोड़कर जो अपने निष्कर्तृत्वादि को जानता है वही आत्मज्ञानी है, दूसरा नहीं। यही भाव उपदेशसाहस्त्री में इस प्रकार स्पष्ट किया गया है—

यो वेदलुप्तदृष्टत्वमात्मनोऽकर्तृतां तथा।
ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः॥ ३६॥

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सगुणाश्चालङ्कारवदनुवर्तन्ते। तदुक्तम्—

'उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः'॥ ३७॥ इति।

जीवन्मुक्तदशायां विद्वान् संन्यासी न कथमप्यभिमनुते न चापि कमप्यभिद्रुह्यति। इमे चानभिमानित्वाद्वेष्टृत्वादिसद्गुणास्तस्य ज्ञानसाधनानि न भवन्ति प्रत्युत तस्मिन्नप्रयत्नेनैव स्वतो लक्षणरूपेणावलोक्यन्ते। 'नैष्कर्म्यसिद्धि' एतदेव 'उत्पन्नात्मावबोधस्य'—इत्यादिनाऽभिव्यक्तीकृतम्॥ ३७॥

जीवन्मुक्त दशा में विद्वान् संन्यासी भी विषय का अभिमान या किसी से द्वेष नहीं करता। वे सब गुण उसके साधन नहीं बनते, प्रत्युत उसमें अपने-आप लक्षण के रूप में दिखलाई देने लगते है। नैष्कर्म्यसिद्धि में यही बात 'उत्पन्नात्मावबोधस्य' इत्यादि रूप से कही गयी है॥ ३७॥

उपसंहारः

किं बहुनाऽयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःख-लक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः संस्तदवसाने प्रत्य-गानन्दपरब्रह्मणि प्राणे लीने सत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात्परम-कैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डब्रह्मावतिष्ठते । 'न तस्य प्राणा उत्क्रामन्ति' अत्रैव समवलीयन्ते, 'विमुक्तश्च विमुच्यताम्' इत्यादिश्रुतेः ॥ ३८ ॥

इति श्रीमत्परमहंसपरिव्राजकार्यसदानन्द-
विरचितो वेदान्तसारः समाप्तः ॥

—:o:—

उपसंहारः—[अथ वेदान्तो नामेत्यारभ्यैतावता ग्रन्थप्रबन्धेनोत्तरोत्तरमेत-दुक्तं ग्रन्थकारेण यद् 'अस्या वेदान्तविद्यायाः स एवाधिकारी यः साधनचतुष्टय-सम्पन्नः, तदनन्तरं मूलाज्ञाननिवृत्तिपूर्वकं परमानन्दप्राप्त्यर्थम् 'अध्यारोपाप-वाद'-न्यायेनैतदखिलप्रपञ्चस्याविद्यात्वञ्च प्रदर्शितम् । ततस्तदविद्याविनाशन-साधनभूतानि श्रवणमननादीनि सविस्तरं विवेचितानि; तदनन्तरं 'तत्त्वमसी'-त्यादिवाक्योपदेशश्रवणेन ब्रह्मजीवयोरैक्यज्ञानपूर्वकं निरस्तसमस्तभेदबुद्धेरधि-कारिणो जीवन्मुक्तदशा वर्णिता]

एतावदेवालमित्यलमनल्पेनेति धिया ग्रन्थमुपजिहीर्षुर्ग्रन्थकार आह—किंबहु-नेति । जीवन्मुक्तो जनो जीवन्मुक्तदशायां निरस्तसमस्तभेदभावप्रतीतिस्स्वयं प्रकाशात्मानन्दमनुभवन् ब्रह्मभूत एवावतिष्ठते । तथाप्यविद्यालेशवशाच्छरीर-यात्रामात्रार्थं स्वेच्छाकृतानां भिक्षाटनादीनां तथा समाधिदशायां शिष्योपनीता-न्नादिरूपाणां परेच्छाकृतानामेवं जाग्रदवस्थायां कण्टकवेधादीनामनिच्छा-कृतानामेवं त्रिविधप्रारब्धकर्मणां सुखदुःखलक्षणानि फलान्यनुभवन्नपि स्वोपलब्ध-ज्ञानेनाखिलं तत्त्वमवगच्छतीति भोगेनारब्धकर्मक्षये प्रत्यगभिन्नपरमात्मनि विलीने च तत्प्राणादावज्ञानजन्यतत्संस्काराणामपि विनाशात्परमकैवल्यम्, परमानन्दैकरसम्, निरस्तसमस्तभेदप्रतिभासम् ब्रह्ममात्रमवतिष्ठते ।

इत्थं जीवन्मुक्तस्य बुद्ध्याद्युपाधिविगमे घटाद्युपाधिविनिर्मुक्ताकाशवत्तस्य 'मुक्त' इति संज्ञा सञ्जायते । इत्थं विनष्टोपाधेर्जीवन्मुक्तस्य लिङ्गशरीर-मत्यन्तसन्तप्तायःप्रक्षिप्तपयःपृषदिव प्रत्यगभिन्नपरमात्मन्येव विलीयतेऽतस्तस्य स्थूलशरीरं न ततः कथमपि चेष्टते । एवं स विगततदानीन्तनतनुस्तु भवत्येवै-

तदतिरिक्तं भाविदेहबन्धनात्स विशेषेण मुक्तो जायते। निम्नाङ्कितश्रुतिष्वप्यै-दम्पर्यमेवोपलभ्यते 'न तस्य प्राणा उत्क्रामन्ति' 'अत्रैव समवलीयन्ते, विमुक्तश्च विमुच्यते' इत्यादि ॥ २८ ॥

संस्कृत-टीका समाप्ता

—: ० :—

['अथ वेदान्तो नाम' यहाँ से लेकर ग्रन्थकार ने यहाँ तक उत्तरोत्तर यह बतलाया कि इस वेदान्तविद्या का अधिकारी वही हो सकता है, जो साधन-चतुष्टयसम्पन्न हो, इसके अनन्तर मूल अज्ञान की निवृत्ति करके परमानन्द की प्राप्ति के लिए 'अध्यारोपापवाद'—न्याय से यह प्रदर्शित किया कि यह सब प्रपञ्च अविद्या है। तत्पश्चात् उस अविद्या के नाश करने के साधन श्रवण, मनन इत्यादि का सविस्तार विवेचन किया। इसके पश्चात् 'तत्त्वमसि' आदि वाक्यों के उपदेश से जीव-ब्रह्म के एकत्व-साक्षात्कारपूर्वक समस्त भेद-बुद्धि के नष्ट हो जाने से जीवन्मुक्त दशा का वर्णन किया।]

इतना ही बहुत है—अब अधिक लिखने की आवश्यकता नहीं; इस विचार से ग्रन्थकार लिखते हैं कि जीवन्मुक्त मनुष्य जीवन्मुक्तावस्था में आत्मानुभव मात्र ही में तत्पर रहता है, उसको किसी प्रकार की भेदभाव-प्रतीति नहीं होती, फिर भी वह शरीर चलने मात्र के लिए स्वेच्छाकृत भिक्षाटनादि तथा समाधि दशा में शिष्यादिकों के द्वारा दिये हुए अन्नादि रूप परेच्छाकृत एवं जाग्रत दशा में या समाधि दशा में अकस्मात् कण्टकादि लग जाने रूप अनिच्छाकृत—इन तीनों प्रकार के प्रारब्ध कर्मों से उत्पन्न सुख—दुःखों का अनुभव करता हुआ भी अपने ज्ञान द्वारा सब बातों को वास्तविक रूप से देखता है और भोग के द्वारा जब प्रारब्ध कर्म नष्ट हो जाते हैं, तब प्रत्यग-भिन्न परमात्मा में उसके प्राणादि विलीन हो जाते हैं, अविद्या एवं तज्जन्य कोई संस्कार शेष नहीं रहते तथा सब भेद-भाव नष्ट होकर ब्रह्ममात्र अवशिष्ट रह जाता है। इस प्रकार जब इस जीवन्मुक्त की बुद्धयादि उपाधि विलीन हो जाती है तो घटादि उपाधि के नष्ट हो जाने से आकाश की तरह उसकी 'मुक्त' यह औपचारिक संज्ञा हो जाती है। वास्तव में तो वह आत्मा न बद्ध होता है, न मुक्त होता है :—

वद्धो मुक्त इति व्याख्या गुणतो मे न तत्त्वतः ।
गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम् ॥

उपाधि नष्ट हो जाने पर जीवन्मुक्त का लिङ्ग-शरीर अत्यन्त सन्तप्त लोहे पर पड़े हुए जल-बिन्दु के समान प्रत्यगभिन्न परमात्मा में विलीन हो जाता है। अतः उसका स्थूलशरीर फिर कोई काम नहीं करता। इस प्रकार उसका वर्तमान शरीर तो नष्ट ही हो जाता है, पर भावी देह के बन्धनों से वह विशेष रूप से मुक्त हो जाता है। यही बात निम्नाङ्कित श्रुतियाँ कहती हैं :—

'न तस्य प्राणा उत्क्रामन्ति''अत्रैवं समवलीयन्ते''विमुक्तश्च विमुच्यते' इत्यादि ।

हिन्दी टीका समाप्त

समाप्तश्चायं ग्रन्थः

—:०:—

आगरा विश्वविद्यालय के वेदान्तसार-विषयक प्रश्न

Explanation

Explain the following

१ बुद्धितत्स्थ······स्फुरेत् ।
२ विक्षेपशक्तिः·········उपादानञ्च भवति ।
३ अस्मिन् वाक्ये नीलमुत्पलम् ······वाक्यार्थो न सङ्गच्छते ।
४ शक्तिद्वयवदज्ञानोपहित······उपादानञ्च भवति ।
५ सामानाधिकरण्यम्···पदार्थप्रत्यगात्मनाम् ।
६ लये सम्बोधयेत्······स्मृताः ।
७ इदमेव तुरीयम्······चोच्यते ।
८ भिद्यते हृदयग्रन्थिः······परावरे ।
९ अज्ञानं तु······श्रुतेश्च ।
१० इदं तत्त्वमसि······तदुक्तम् ।
११ अयं घटः······तदुक्तम् ।
१२ अनयैवावरणशक्त्या······जगत्सृजेत् ।
१३ संसर्गो वा······विदुषां मतः ।
१४ एवञ्च सति······तदुक्तम् ।
१५ फलव्याप्यत्वमेवास्य······वृत्तिव्याप्तिरपेक्षिता ।
१६ असर्पभूते······श्रुतेश्च ।
१७ निर्विकल्पकस्तु······भेदोपपत्तेः ।
१८ जीवन्मुक्तो नाम······ब्रह्मनिष्ठः ।
१९ वनवृक्षतदवच्छिन्नाकाशयोः······लक्ष्यमिति चोच्यते ।
२० न च तत्पदं त्वत्पदम्······अपेक्षाभावाच्च ।
२१ जडपदार्थाकाराकारितः······स्फुरेत् ।
२२ अपवादो नाम······तदुक्तम् ।
२३ सतत्त्वतोऽन्यथाप्रथा······इत्युदीरितः ।
२४ अनेन विघ्नचतुष्टयेन······तदुक्तम् ।
२५ किं बहुना······अवतिष्ठते ।

General Questions

1 Discuss the nature of unreality according to वेदान्त ।
2 Analyse the vedantic conception of अज्ञान ।
3 What do you gather from your study of वेदान्तसार ।

With regard to the Vedantic conception of God, Soul & the World ?

4 Write a note explaining as clearly as you can the Vedantic conception of बन्ध & मोक्ष ।

5 Define अज्ञान mentioning its chief शक्ति and their work. How does a Vedantic reach the conception of nonduality in spite of the apparent diversity ?

6 Compare the nature of आत्मा in Vedant with that of पुरुष in Samkhya ?

7 Give a clear exposition of the Vedant doctrine of अध्यारोप Discuss its merits in explaining the appearance of plurality and difference.

8 Following the Vedantsar write a short essay on the nature and the relation of ब्रह्मन्, जीव and ईश्वर ।

9 Write and short essay on the Vedant conception of अध्यास (illusion) & अज्ञान (ignorance).

10 Explain fully the nature and significance of the theory of जीवन्मुक्त ।

11 Write notes on :—
अजहल्लक्षणा, सविकल्पकसमाधि, भागलक्षणा, पञ्चीकरण, आवरणशक्ति, विघ्नचतुष्टय, महावाक्य, जीवन्मुक्त, वैश्वानर, लिङ्गशरीर, अध्यारोप, तन्मात्राणि, विक्षेपशक्ति, विवर्त ।

12 Explain the position of अध्यारोप & अपवाद and point out the वाच्यार्थ & लक्ष्यार्थ of the padas in the महावाक्य 'तत्त्वमसि' ।

13 Explain fully the process of creation according to Vedant and compare it with that of सांख्य ।

14 What kind of Ethical is prescribed for a मुमुक्षु in Vedant.

15 What do you know about the प्रमाण in Vedant system of thought ?

16 How would you reconcile the contradictory statements contained in the श्रुति like 'मनसैवानुद्रष्टव्यं' and 'यन्मनसा न मनुते' ।

वेदान्तसारे सम्भाव्यप्रश्नाः—

१ 'वस्तुन्यवस्त्वारोपोऽध्यारोप' इति सम्यग् व्याख्याय, इदमज्ञानं समष्टि-व्यष्ट्यभिप्रायेणैकमनेकमिति सप्रमाणं विविच्य, ईश्वरप्राज्ञयोर्भेदं लिखत।

२ पञ्चीकरणप्रक्रियया स्थूलसृष्टिं निरूप्य, वैश्वानर-विश्वयोर्भेदं सुस्पष्टं प्रकाशयत।

३ आत्मनि विविधवादिसम्मतमारोपं निरस्य, वेदान्तपक्षः समर्थ्यताम्।

४ 'तत्त्वमसीतिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति' इति सोपपत्तिकं विशदं व्याख्यायताम्।

५ श्रवण-मनन-निदिध्यासन-समाध्योर्लक्षणनिर्देशपूर्वकं व्याख्यायन्ताम्।

६ वेदान्तस्य अनुबन्धचतुष्टयमज्ञानस्य शक्तिद्वयं च प्रदर्श्य, सूक्ष्मशरीरं कथं भवतीति सविस्तरं प्रतिपाद्यताम।

७ तत्त्वमसीतिवाक्याल्लक्षणयाऽखण्डचैतन्यं कथं प्रतीयत इति वेदान्तसार-दिशा विविच्यताम्।

८ द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते॥
सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः॥
इति कारिके सोपक्रमं व्याख्येये।

९ वेदान्तस्य मीमांसाशास्त्रस्य च क उपयोगः, के च तयोः शास्त्रयोः प्रवर्तकाः आचार्याश्च इति विषयस्पष्टीकरणपूर्वकं पृष्ठद्वयात्मको निबन्धो लिख्यताम्।

१९ निम्नेषु पञ्चसु तृतीयमविहाय त्रयाणां वेदान्तसारस्थतत्तत्प्रकरणानुसारं व्याख्या कार्या—

(क) बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम्।
तत्राज्ञानं धिया नश्येदाभासेन च घटः स्फुरेत्॥

(ख) फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता॥

(ग) संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः॥

(घ) समानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥
(ङ) सतत्त्वतोऽन्यथा प्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृतः ॥

११ निम्नद्वादशसु वर्णा पदानां वेदान्तसारदिशा भेदप्रदर्शनपूर्वकं लक्षणं लिख्यताम् । अध्यारोप-अपवाद-अज्ञान-प्राण-ईश्वर-लिङ्गशरीर-अन्तः-करण-पञ्चकोश-वैश्वानर-धारणा-ध्यान—समाधयः ।

१२ निम्नलिखितेषु पक्षत्रयेषु भवते यः रोचते तस्यैकस्य समर्थनं विरोधिपक्ष-द्वयखण्डनपुरस्सरं सयुक्तिकं विधीयताम् ।
(क) निःश्रेयसम्प्राप्तये वेदान्तानुसारमात्मजिज्ञासा कर्तव्या इत्येकः पक्षः ।
(ख) स्वर्गादिसुखप्राप्तये मीमांसानुसारं धर्मजिज्ञासा कर्तव्या इति द्वितीयः पक्षः ।
(ग) धर्म-आत्मोभयजिज्ञासया पुरुषार्थसिद्धिरिति तृतीयः पक्षः ।

१३ वेदान्तस्याधिकारि विषय-सम्बन्ध-प्रयोजनान्युल्लिखत ।

१४ अज्ञानं तस्य शक्तिद्वयश्च किमिति निरूप्यताम् ।

१५ द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः । स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ॥ इति कारिकोक्तः पञ्चीकरणप्रकारो निरूपणीयः ।

१६ उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥ इति ससन्दर्भं व्याख्येयः ।

१७ कथं तत्त्वमसीतिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति ।

१८ दृशिस्वरूपं गगनोपमं परं सकृद् विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तमोम् ॥ इति ॥

१९ सोपपत्तिकं जीवन्मुक्तलक्षणं निर्दिश्यताम् ।

२१ यागादिना स्वर्गप्राप्तिः, ज्ञानेन तु ब्रह्मप्राप्तिरित्यनयोः कल्पयोः कः श्रेयान् इति विविच्यताम् ।

२१ पूर्वोत्तरमीमांसयोः के के प्रधानाचार्याः किन्तेषां महत्त्वमिति च निबध्नीत ।

२२ वेदान्ताधिकारप्रापकं साधनचतुष्टयं सम्यग् विवरणीयम् ।

२३ (क) अज्ञानस्य स्वरूपं साधनचतुष्टयं सम्यग् विवृत्य तत्कृतः प्राज्ञसर्वज्ञ-भेदः स्फुटं निरूप्यः ।

नगदी पुर्जा

संख्या.................

समाधी सम्यग् ...

२४ अज्ञानस्य किं लक्षणम्, कि च तस्य शक्तिद्वयम् ? लिङ्गशरीरस्यावयवाः के ? पञ्चीकरणं कीदृशम् ? किं महावाक्यम् ?

२५ कः परिणामः ? कश्च विवर्तः ? किं जगतः परिणाम्युपादानं, किञ्च विवर्तोपादानम् ? महावाक्यस्य कोऽर्थः ? स च कया रीत्या कथं प्रतिपाद्यः ?

२६ फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥
पद्यमिदं केन प्रसङ्गेनोपन्यस्तम् ? कथञ्चेदमीयोऽर्थः ?

२७ जीवस्य किं स्वरूपं, जाग्रत्स्वप्नसुषुप्तिषु तस्य क उपाधयः कानि च तस्य विभिन्नानि नामानि, किञ्च स्वरूपमीश्वरस्य, तस्य च क उपाधय उक्तावस्थासु, के च नामभेदाः ? समग्रमिदं स्पष्टतया समाधेयम् !

२८ 'तत्त्वमसि' इत्यैतद्वाक्यस्ययोः 'तत्' 'त्वम्' पदयोः शोधनप्रकारं वर्णयित्वा तत्र भागत्यागलक्षणया अनिवार्यत्वमुपपाद्यताम् ।

२९ 'मनसैवानुद्रष्टव्यम्' 'यन्मनसा न मनुते' इत्यनयोः श्रुत्योरविरोधमुपपाद्य घटादौ बुद्धितत्स्थचिदाभासयोर्व्याप्त्युपगमस्य प्रयोजनप्रतिपाद्यताम् ।

३० कानि षड् लिङ्गानि, कथञ्च तानि वेदान्तानामद्वयब्रह्मपरत्वं प्रत्याययन्ति ? इत्येतदुभयं समाधाय निर्विकल्पकस्य विघ्नचतुष्टयं तत्परिहारोपायसहितं विज्ञाप्यताम् ।

३१ वेदान्तं तत्प्रमेयं तद्विद्याधिकारिणं च निर्वर्ण्य मुक्तिकामस्य प्रथमं कर्तव्यमभिधीयताम् ।

३२ अज्ञानं लक्षयित्वा तस्य शक्तिद्वयं नामतः फलतः शंसता तदाश्रयविषयौ प्रतिपाद्येताम् ।

३३ 'तत्त्वमसि' इति महावाक्यस्याखण्डार्थबोधकत्वं ग्रन्थोक्तरीत्या व्यवस्थाप्यताम् ।

३४ समाधिं सभेदंससाधनं च वर्णयता निर्विकल्पकस्य चत्वारो विघ्नाः निराकरणोपायसहिताः निरूप्यन्ताम् ।

—:०:—

कतिपय परीक्षोपयोगी प्रश्नोत्तरात्मक ग्रन्थ

साहित्यदर्पणालोकः (प्रश्नोत्तरात्मकः) । श्री रामजीलाल शर्मा
काव्यप्रकाश-रहस्यम् (प्रश्नोत्तरात्मकः) । श्री रामजीलाल शर्मा
चन्द्रालोक-रहस्यम् (प्रश्नोत्तरात्मकः) । मानवल्ली तथा वेताल
शिशुपालवध-रहस्यम् (प्रश्नोत्तरात्मकः) १—४ सर्ग । अशोकचन्द्र गौड़
सांख्यकारिकादर्शः (प्रश्नोत्तरात्मक) । श्री राजेन्द्रप्रसाद कोठारी
अलङ्कारशास्त्रस्येतिहासः (प्रश्नोत्तरात्मकः) । श्रीपरमेश्वरदीन पाण्डेय
नलचम्पू-रहस्यम् (प्रश्नोत्तरात्मकः) १—५ उच्छ्वास परमेश्वरदीनपाण्डेय
वेदान्तसार-प्रदीपः (प्रश्नोत्तरात्मक.) । श्री राजेन्द्रप्रसाद कोठारी
मध्यसिद्धान्तकौमुदी-चन्द्रिका (प्रश्नोत्तरात्मकः)विजयमित्र शास्त्री
मृच्छकटिक-सोपानम् (प्रश्नोत्तरात्मकः) । डॉ० नरेश झा
वेणीसंहार-रहस्यम् (प्रश्नोत्तरात्मकः) । श्री परमेश्वरदीन पाण्डेय
रघुवंश-रहस्यम् (प्रश्नोत्तरात्मकः) । १—५ सर्ग । श्रीरमाशंकर मिश्र
दशरूपक-रहस्यम् (प्रश्नोत्तरात्मकः) । त्रिलोकीनाथ द्विवेदी
सारसिद्धान्तकौमुदी । 'राका'-संस्कृत-हिन्दीव्याख्यासहित ।
व्याख्याकर—लोकमणि दाहाल । १—४ भाग । प्रत्येक भाग
भारतीय-संस्कृतिः । लोकमणि दाहाल
संस्कृतभाषाविज्ञानम् । डॉ० शिवप्रसाद द्विवेदी
चन्द्रकलानाटिका-रहस्यम् (प्रश्नोत्तरात्मकः) श्री परमेश्वरदीन पाण्डेय
संस्कृतसाहित्येतिहासः (प्रश्नोत्तरात्मकः) । श्री परमानन्द शास्त्री
रसगङ्गाधर-हृदयम् । (प्रश्नोत्तरात्मकः) । श्री ज्ञानचन्द्र त्यागी
लघुसिद्धान्तकौमुदी-चन्द्रिका (प्रश्नोत्तरात्मकः)विजयमित्र शास्त्री
कादम्बरी-कलाप्रकाशः (प्रश्नोत्तरात्मकः) डॉ० नरेश झा
मधुमञ्जूषारहस्यम् (प्रश्नोत्तरात्मकः) । स्वामी रमेश्वर पुरी
शाकुन्तलरहस्यम् (प्रश्नोत्तरात्मकः) श्री त्रिलोकीनाथ द्विवेदी
मेघदूत-तत्त्वालोकः (प्रश्नोत्तरात्मकः) डॉ० अशोकचन्द्रगौड़ शास्त्री
महाभाष्यनवाह्निकालोचनम् (प्रश्नोत्तरात्मकः) विजयमित्र शास्त्री
मुक्तावली-प्रकाशः (न्यायसिद्धान्तमुक्तावली-प्रश्नोत्तरी) ।
श्री राजेन्द्रप्रसाद कोठारी
औचित्यविचारचर्चा-मञ्जरी (प्रश्नोत्तरात्मकः) डॉ० नरेश झा
वक्रोक्तिजीवितम् (प्रश्नोत्तरात्मकः) । डॉ० नरेश झा
भारतीयसंस्कृति-सोपानम् (प्रश्नोत्तरात्मकः) डॉ० शिवप्रसाद द्विवेदी